No. १४९८

Title गदाधरी - काशिकाव्याख्या अनुमान खण्डः

Author गदाधरः

Extent २६ Age ×

Subject न्याय वैशेषिकं

२६ पत्रे

गाधापरीटीकायां काष्ठिकाख्यायां
ऋतुमानसंकेतः

१४५७ ९

पत्र २८

श्लोक

५००

ग॰टी॰ श्रीगणेशाय नमः। किं त्विति गगनसाध्यके गगनाभावगर्भबाधज्ञानानुद्धेधे न साध्यतावच्छेदकसंबंधत्वमात्रे साध्यप्रतियोगिकत्वस्य ज्ञानविशे-
१ ष्यानुयोगिकत्वोभयाभाववत्त्वं साध्यवदविशेष्यकत्वं बोध्यं। मूलावच्छिन्नो वृक्षः कपिसंयोगी स्यादौ कपिसंयोगाभावविशिष्टमूलावच्छिन्नवृक्षो
बाधस्य ज्ञानस्यावच्छेदकावगाहितया तादृशसंबंधेन साध्यप्रतियोगिकत्वसमुल्लिखितावच्छेदकावच्छिन्नत्वप्रज्ञानविशेष्यानुयोगित्वैतत्त्रित-
याभाववत्त्वमेव। अवच्छेदकानुल्लेखे तु वृक्षः कपिसंयोगाभाववानित्यादौ पूर्वोक्तोभयाभावगर्भप्रमात्वाभावान्नातिव्याप्तिः। साध्यवदविशेष्यक-
ज्ञानप्रकारसाध्याभाववान् पक्ष इति निश्चयेप्याग्रसन्न पाद्रुदेवह्निलिंगकपावह्निमद्रुदविशेष्यकत्वाघटिताप्रामाण्यशंकाकलंकितत्वेनाप्रतिबं-
धके साध्यवदविशेष्यकज्ञानप्रकारकसाध्याभावविशिष्टह्रदनिरूपितविषयितासत्त्वेन तादृशविशिष्टस्य दोषत्वासंभव इति स्वविशेष्यकत्वं ज्ञानवि-
शेषणं। एवं च पक्षविशेष्यकसाध्यवदविशेष्यकज्ञानकारसाध्याभावविशिष्टपक्षस्य दोषत्वं। एतादृशविशिष्टग्रह पूर्वपक्षे साध्यसंशयो न संभव-
तीति तदानीं ह्रदे साध्यवदविशेष्यकज्ञानविशेष्यत्वरूपव्यावर्तकधर्मनिश्चयस्याव्यापकत्वादिति नोक्तरीत्याऽप्रामाण्यशंकेति तादृशविशिष्टवि-
षयितासाप्रतिबंधकतानतिरिक्तवृत्तित्वमस्य तमेवेत्याशयः। स्वविशेष्यकत्वं च दोषघटकतामभिप्रेत्याभिहितं किंतु स्वरूपकीर्तनमात्रमित्य-
न्ये। प्रमात्वं चेत्साध्याभाववद्विशेष्यकत्वं तदा पर्वतो ह्रदश्च न वह्निमानित्यादौ साध्याभाववद्विशेष्यकज्ञानप्रकारसाध्याभावविशिष्टपर्वताप्रसि- रा॰म॰
द्ध्या पर्वतपक्षके बाधप्रसंगाभावेपि भ्रमसाधारणप्रमात्वनिश्चयो न प्रतिरुद्धोपयिक इत्यत आह प्रमासमिति। ननु भ्रमधायिपादृशानिरूप्यनिरू- १

पकभावः बस्या प्रतिपाद्यः तादृशस्यैव तस्य प्रकृते विवक्षणात्कार्येपि स तत्राह सविषयकेति। ज्ञानस्य विषय इत्यादिव्यवहारविषयत्वमर्थः। ए
तच्चज्ञानविषयतायो निरूपकभावः तस्य कथं षष्ठ्यर्थत्वेति शंकानिरासाय। विषयतानात्मकेति तथा चैतन्मते प्रकारतानविषयतारूपा किं
त्वन्यैवेति विशेष्यतारूपविषयतायां षष्ठीप्रतिपाद्यस्वप्रकारतानिरूपितत्वस्योपगमेपि न विषयतायां विषय इति व्यवहारापत्तिरिति भावः।
अवच्छेदकताविशेषः। हृदादिनिष्ठविषयतानिरूपितावच्छेदकता। पक्षनिष्ठत्वादिकमित्यादिपदैर्यथाक्रमं प्रकारत्वसाध्याभावानां परिग्रहः।
पक्षनिष्ठत्वस्याभावविशेषणत्वे हृदो न वह्निमानिति ज्ञाने प्रामाण्यनिश्चयेपि घटसदिति प्रमाविषयत्वप्रकाराभावप्रतियोगिसाध्यकत्वरूपवि
शिष्टस्य दोषत्ववारणाय तस्य विषयताविशेषणत्वं। एवं प्रकारत्वस्य साध्यविशेषणत्वे बाध इत्यतोऽभावविशेषणत्वं। आदिरूपेत्यादिपदात्सा
ध्यवद्भेदघटितविशिष्टपरिग्रहः। मूले व्यभिचारो व्यभिचारिज्ञानं सत्वज्ञानं इत्युक्तेः तत्र स्वरूपसतः साध्याभावत्वस्याकिंचित्करत्वादाह मूले इ
ति। उदर्शितेति। तत्र प्रमात्वांतरप्रवेशस्यानावश्यकत्वसूचनाय। सकलेति साध्यनिष्ठहेतुव्यापकताघटितआत्तेरित्यर्थः। संदिग्धसाध्य इति वि
शेषणानुरोधाधाचष्टे पक्षभिन्न इति। पक्षे व्यभिचारसंशयस्य साध्याभावांशे संशयरूपस्य प्रतिबंधकत्वे विवादस्याहरणाय दृष्टांतः। निश्चितसाध्यक
पक्षे इच्छाधीनानुमितेः सत्वात् संदिग्धेति। समाधाने संशयनिरस्तमिधानास्यूरपतिकथचिदिति संशयेनाशेन। ननु व्यभिचारस्यानुमित्साविरो
धित्वात्तानुमितिमात्रोच्छेदरूपानुपपत्तिरित्यत आह परामर्शेति। ननु व्यभिचारस्यानुमितिविरोधित्वे पूर्वं भ्रांति निश्चयेपि व्यभिचारसंशयस्य दूष

ग॰ टी॰ कत्वात्तद्दोषायेत्यसंगतं। तस्यानुमितिविरोधित्वेच बाधस्य हेत्वाभासत्वं दुर्वारमित्याशंक्याह एवं चेति। लाघवेनिश्चितायामित्यादिना व्यभिचारसं
२ शयस्य तद्विघटकत्वलाभोऽतीतग्रंथेनातत्त्वमितिलाभः। संशयपदोपादानाद्व्याप्तिनिश्चयस्यानुमितिविरोधित्वलाभः। शंकितायाइतितथा
५ चउष्टहेतुजन्मत्वासंशयात्वाप्रामाण्यशंकोदयइतिभावः। पक्षइत्यादिमूलंव्यभिचारसंशयस्यापिसाक्षादनुमितिप्रतिबंधकत्वेपिव्याचक्षा
णानांमतमाह केचित्त्विति। उत्पादस्य तन्मात्रस्य। असंगतिःन्यूनताप्रयुक्ता। आपीति। अनुमित्युत्पादेनेत्यनंतरमितिशेषः। फलप्राह्यस्यतो
संशयानुत्पादनिर्वाहकत्वान्न्यायत्वं। अभिप्रायेणधर्मिघटितव्यभिचारमानाभावइत्याशयः।। अकिंचित्करं नहेत्वाभासत्वभंगकरं। दूषयिष्यतीत्यस्तुत
इत्यादिना। अनुमितावेवेत्येवकारफलमनुपदमग्रे। तदभावस्येत्यादिमूलमव्याप्यव्यभिचारघटकेति। नन्वन्यथाव्याप्तिभयेनव्यधिकरणधर्माव
च्छिन्नाभाववादिभिःप्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानंविनैवाभावांशेऽप्यात एव अधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वभानोपगमा
दिविशिष्टायसिद्धेतिमूलासंगतिरतःप्रतियोगिविशेषणतापन्नस्येतिनियमानुसारेणतद्देदेकदेशिमताभिप्रायकतया अन्यथाव्याप्तिरूपप्रतियोगि
तावच्छेदकविशिष्टप्रतियोगिज्ञानमंगीकरोतिप्रमात्मकेति। विशेषदर्शिनांवह्निर्नकांचनमयइतिज्ञानिनां। अप्रसक्तेः प्रागनाशंकितत्वात्। इदा
नीमेवाशंकासंभवादाह साध्याभावेति। पक्षासिद्धिरिति। नचैवमपिपर्वतादेःपक्षत्वंशुद्धवह्नित्वावच्छिन्नाभावनिश्चयसंभवात्पक्षासिद्धितादव गम॰
स्थ्यमेव। एतन्मूलस्यतादृशनिश्चयासत्त्वस्थलेकांचनमयत्वेनवह्न्यभावस्यबाधत्वव्यवस्थापनपरत्वेऽपनीतकांचनमयत्वविशिष्टवह्निसा २

धकसद्धेतुस्थलानुसरणाद्वैयर्थ्यादितिवाच्यं। असद्धेतौ पक्षतावच्छेदकावच्छिन्नेसाध्याभावानिश्चयेपिअभिकरणांशेनिधर्मितावच्छेदककव्यभि
चारनिश्चयस्यसत्त्वरूपाशिद्धिनिश्चयस्यवासंभवइत्याशयेनतदनुसरणात्। वास्तवत्वंहेत्वाभासत्वं। तन्मूलकेति। अप्रामाण्यज्ञानदशायांसाध्यमा
नोपनयद्वाराद्वाविशेष्येविशेषणमितिरीत्याज्ञानेविशिष्टज्ञानमनावश्यकमित्यत्राभिप्रायेणोक्तेति। अन्यतज्ज्ञानंउक्तेतिज्ञातयोरित्यादिः। वि
रोधिनएवतत्वात्। अनुमितावितिसामग्रीसमाजात्पर्वतःकांचनमयवह्निमानित्येवानुमितिरितिभावः। उच्छेदइति। उपनायकज्ञानस्यानु
पयोगादितिभावः। सर्वैरेवेति। व्याप्यवत्ताज्ञानविशेष्यमुख्यविशेष्यकत्वस्यागमात्रेणदर्शितानुमितिनिर्वाहादितिभावः। मूलेसामान्य
तोदृष्टेसामान्यधर्मावच्छिन्नव्याप्तिपक्षधर्मताभ्यांनिश्चीयमानं। गा॰ इतरेति। इतरत्वाधघटितसामग्रीप्रयोज्यविशेषधर्मावच्छिन्नविधेयताकानुमा
पकं। पर्वतीयान्यवन्ह्यभाववत्पर्वतरूपविशेषबाधज्ञानस्याप्रमात्वेपरिशिष्यमाणस्यपर्वतीयवन्ह्यभाववत्पर्वतात्मकबाधस्याप्रमाप्रयोजक
त्वाभावादुक्तं। बाधकानामाभासत्वेइति इतरबाधजनकानामप्रमाणत्वप्रयोजकानामभिधानंव्यर्थमितीतरबाधग्रहाणामप्रमात्वविवक्षितिपक्षे
तिपक्षमहानसीयान्यवन्ह्यादेवीबोगृहीतइत्यर्थः। पर्वतोमहानसीयान्यवन्ह्यभाववानितिग्रहस्याप्रमात्वेइतिपावत्। एवंचतथाविधेतरबाधग्रह
दशायांपापर्वतोमहानसीयवह्निमानित्यनुमितिस्तस्याअप्रमारूपापाजनकत्वंपरामर्शस्यपरिशिष्यमाणोमहानसीयान्यवह्निमिन्नोयोविशेषः
महानसीयवह्निस्तद्बाधप्रयुक्तमेवनतुतद्विशेषबाधप्रयुक्तं। महानसीयान्यवन्ह्यभावविशिष्टपर्वतरूपविशेषबाधस्याप्रमाप्रयोजकत्वाभावाद

नः तत्प्रयुक्तपदं व्याचष्टे परीति। अनपवादमेवेति। तथाच बाधाभिमतानुमित्याभासताप्रयोजकत्वस्य तन्निर्वाहकहेत्वाभासत्वस्य वीक्षितत्वात्तत्र तत्प्रा
दोषत्वादित्संते न हेत्वाभासतानिराकृत्य तन्निर्वाह्यानुमित्याभासतानिराकरणं न संगच्छतेऽइति भावः। अनुमितेरप्रतिबद्धिर्नास्तीत्याशयेन शंकते पप
पीति। स्वतंत्रहेत्वाभासताविचारः प्रक्रांत इति तन्निर्वाहकाभिधानमनुपयुक्तः न तु तन्निर्वाह्यानुमित्याभासताप्रयोजकत्वाभिधानमिति समाधत्ते तथा
पीति। स्वतंत्रेति इतरप्रयोज्यानुमित्यनुत्पादप्रयोजकग्रहविषयत्वस्य हेत्वाभासव्यवहारविषयताप्रयोजकत्वादिति भावः। एवं च स्वतंत्रहेत्वाभा
सताप्रयोजकं तुर्दंचमिति पूर्वपक्ष्याशयः। एतावता प्रबंधेन साध्याभाववद्विशिष्टपक्षस्य स्वतंत्रबाधता निराकृता इदानीं साध्याभावव्याप्यविशिष्ट
पक्षस्य स्वतंत्रबाधत्वं शंकते मूलेनन्विति। न· कारणाभावादेवानुमित्यनुत्पादनिर्वाहे पक्षे साध्याभाववत्त्वं तद्व्याप्यवत्त्वं वा दोष एव न स्यादतः पूर
पतिहेतोरिति। अथैतस्येति व्यभिचारग्रहविधया पद्रूपावच्छिन्ने हेतुमत्त्वं गृहीतं तद्रूपावच्छिन्ने साध्याभावज्ञानत्वेन एतदुल्लेखस्य प्रकृतत्वात्कारणा
पन्नायतिभवत्विति। तथाच साध्याभावस्य यद्बाधत्वनिराकरणं तदंगीकृत्यैव बाधदोर्लभ्यस्य वारणीयतया न तस्य प्रकृतत्वमिति भावः। मूले ज्ञायमाने इ
ति साध्याभावग्रहस्य हेतुसमूहालंबनत्वार्थं ज्ञाने इति हेतुमत्ताग्रहपार्थक्यार्थं साध्याभावेति। हेतुमत्वे न ज्ञायमान पक्षे साध्याभावव्याप्यवत्ताबुद्धिरित्यर्थः। व्य ग०म० ३
भिचारस्यानुमितिविरोधित्वाद्व्याचष्टे व्यभिचारग्रह एवेति एवकारेणानंतरसाध्याभावव्याप्यवत्पक्षस्य बाधत्वोपगमव्यवच्छेदः। मूले हेत्विति साध्यव्याप्येत्यादि।
अग्रमुमानादविरोधयोरिति। अग्रत्यमानाव न तु नीयमानो विशेषोत्स्वसाध्यरूपोयाभ्यामिति व्युत्पत्त्या स्वस्वसाध्यविधेयकानुमित्यनुपधायकरूपरामर्शो वि

ष्ययोरित्यर्थः। एतेन सत्प्रतिपक्षतानिर्वाहककार्यप्रतिरोध उक्तः। अगृहीताप्रामाण्यकपरामर्शविषययोरिति वार्थः। एतेन पक्षे साध्याभाववत्त्वबुद्धौ सा
ध्यव्याप्यवत्ताज्ञाने ऽप्रामाण्यज्ञाने ऽजायते साध्याभाववद्विशेष्यतानिरूपितसाध्यव्याप्यत्वावच्छिन्नप्रकारताकः साध्याव्याप्यत्वपक्षावृत्तित्वान्यतरवद्
वृत्तित्वादिति सत्प्रतिपक्षासंभवात् व्यभिचारः कथनसंगतिरिति सूचितं। अथेति। शंकावलपदार्थमविविच्य प्रमात्वे निश्चीयमानमिति शेषः। गमकतानौ
पयिकमपि गमकतौपयिकं व्याप्तिपक्षधर्मतात्मकमपि। विरोधीति अन्यथा साध्यव्याप्यवत्ताबुद्धिप्रमात्वानिश्चयदशायां साध्यानुमित्यनुत्पादापत्तेः
। साध्याभावेति। प्रमात्वनिश्चयानुधावनं चायत्वनिर्वाहाय। सत्प्रतिपक्षताविरहः कार्यप्रतिरोधासंभवात्। प्रमितेति बाधत्वनिर्वाहाय। यद्यपि साध्याभा
वव्याप्यवत्ताज्ञानप्रमात्वमिलनेवोचितं तथापि साध्याभावव्याप्यवत्ताज्ञानासत्त्वे तद्धर्मिकप्रमात्वनिश्चयस्याविरोधित्वात् प्रमितेत्युक्तं। हेतुनिष्ठत्वलाभाय
कत्वमिति। एतज्ज्ञानं च तादृशपक्षविषयकं सत् तद्वृत्तिप्रमात्वविषयकमिति नानुपपत्तिः। उभयत्रेति। साध्याभावव्याप्यवत्पक्षज्ञानस्य प्रतिबंधकत्वार्थं
साध्यव्याप्यवत्ताज्ञाने प्रमात्वाग्रहः। बाधविधया दूषकतावारणाय साध्याभावव्याप्यवत्पक्षज्ञाने च तद्दर्शितः। प्रकृतपरामर्शप्रमात्वग्रहाभावविशिष्ट
साध्याभावव्याप्यवत्ताबुद्धित्वं प्रतिबंधकतावच्छेदकं न तु केवलसाध्याभावव्याप्यवत्ताबुद्धित्वमिति समाधत्ते तादृशेति। उभयत्रेति साध्यव्याप्यबुद्धौ प्रमात्व
ग्रहे साध्याभावव्याप्यवत्ताग्रहे तदग्रहे ऽनुमितिर्भवति तत्रापि तद्ग्रहे तदनुत्पादस्योभयप्रतिबंधकत्वेन न निर्वाह इति भावः। अन्यथा प्रकाराभाववत्ति
सिद्धत्वं प्रकारप्रकारकत्वं तद्विरोधात्सुलप्तिमाश्रित्याह प्रमात्वमिति। प्रमात्वनिश्चय इत्यर्थः। बाधकेति तुल्यशेसा साध्याभावव्याप्यवत्ताबुद्धिप्रमात्व

ग०टी० निश्चयाभावविशिष्टसाध्यव्याप्यवत्ताबुद्धेः प्रतिबंधकत्वादितिभावः।व्यभिचारज्ञानेनयद्धर्मावच्छेदेनहेतुमत्ताज्ञानंतद्धर्मावच्छेदेनसाध्याभाववत्ता
४ ज्ञानरूपेण।व्यभिचारज्ञानस्यकार्यकालवर्त्तितयाविरोधित्वाभावादितिभावः।।तदग्रहस्थलेतिदृष्टांतार्थ।उपपत्तेःअनुमित्युत्पादोपपत्तेः तथा
चसत्प्रतिपक्षापधयेवदूषणमितिभावः।व्यभिचारासिद्धेरितिमूलस्यव्यभिचारानिश्चयादित्यर्थः।व्याप्यसंदेहस्यव्यापकसंदेहजनकतयाव्यभिचार
5 सिद्धेर्निश्चयोपादानं।व्यभिचारनिश्चयेतादृशविपक्षत्वस्यग्राह्याभावानात्मकत्वादाहतादृशेति।एतेनव्यभिचारासंकरोव्युत्पादितः।मूलेअसाधकत्वेसि
द्धेसाध्यासाधकत्वनिश्चयेव्यभिचारनिश्चयइत्यर्थः।गाव्यभिचारान्निश्चयात्।मूले।अन्यथाबाधेनहेतोरसाधकत्वसिद्धावनुपगमे।साध्यसिद्धिसंभा
वनासाध्यसाधकप्रमाविपक्षत्वसंभावना।साध्यसिद्ध्युन्मुखेतिकारणाभावस्यावर्त्तनाय।व्यभिचारज्ञानं।तदभावात्व्यभिचारज्ञानासंभवात्।गां·ला
घवादिति।अत्रैतद्ग्रंथस्येदृशाभिप्रायवर्णनंनसम्यक्।अतएवेत्याद्यपिमग्रंथेनपौनरुक्त्यापत्तेः किंतूपजीव्यत्वात्प्रमेवप्रतिबंधिकेतिपर्यवसिता
शयवर्णनमेवसम्यक्।यद्वागदाधरमतेअतएवेत्यादिग्रंथःपक्षेसाध्याभावनिश्चयत्वेनप्रतिबंधकत्वनिरासपरइतिनपौनरुक्त्यं।छन्नत्वादितिमूलस्या
वश्यकत्वादित्यर्थः।नस्वतंत्रेत्यस्यार्थमाहसाध्याभावप्रमायाइति।व्यभिचारज्ञानत्वेनहेतुमत्ताग्रहविशिष्टतद्विषयतावच्छेदकपक्षतावच्छेदकावच्छि रम०
न्नेसाध्याभावज्ञानत्वेनस्वतंत्रेत्यस्यहेतुमत्ताग्रहानवच्छिन्नाइत्यर्थः।प्रमामात्रंप्रतिनिद्धनाज्ञानसामान्यंप्रति।बाधःपक्षेसाध्याभावप्रमा।ननहीतिअ ४
नुमितिमात्रंप्रतिप्रतिबध्यतावच्छेदकत्वाभावादितिभावः।प्रतिबंधकप्रमाविषयत्वंअसाधकतालिंगत्वंचसामान्यलक्षणांतत्राद्यंनास्तीत्याहमनइति।स्वरू

पसत्तइति पाठः। स्वरूपनइति पाठे तु सामान्यतइत्यर्थः। प्रतिबंधकत्वादनुमितस्तु तस्मादनिपठत्वात्। द्वितीयं नास्तीत्याह हेतुत्वेति साध्याभावज्ञानप्रमात्व
स्यबाधत्वं प्राचीनानुमतमालंव्य समाधत्ते उच्यतइति। साध्याभावनिश्चयसामान्यस्यैव तत्प्रमात्वनिश्चयाधीनत्वमतो व्याचष्टे गाः साध्या
भावज्ञानेइति पत्रसाध्याभावज्ञाने प्रमात्वसंशयेनास्ति तत्र प्रमात्वनिश्चयानपेक्षणात्तदनधीनस्य पक्षे साध्याभाववत्तानिश्चयस्य संभवात्तस्यप्र
तिबंधकत्वसंभवे नप्रमात्वज्ञानस्योपजीव्यत्वभंगइत्याशंकावारणाय साध्याभावनिश्चयपदस्य तत्फलपरतामुपेत्य पक्षे साध्याभाववत्तानिश्चयका
र्यप्रतिबंधादिकारित्वस्य तत्प्रमात्वनिश्चयाधीनतामपि तन्मूलार्थतया दर्शयति एवमिति। अप्रामाण्यसंशयायोग्यतया मनाग्भ्रमसाधारणज्ञान
त्ववत्ताज्ञानविशिष्टतयाऽस्य निश्चयकार्यकारित्वाभावे संबंधः। निश्चयइति विषयाविशेषितत्तदुपादानतन्मात्रस्वभावत्वाभावाय। पर्वतेज्ञापमानो
धूमरइत्यर्थः। सत्प्रतिपक्षवत् पक्षे साध्याभावव्याप्यवत्ताज्ञानवत्। नेदंज्ञानमिति ज्ञानस्यग्रह्यमाण्यविशेषणतयाप्रतिबंधकत्वं नसंभवति अतः पूर
यति अप्रामाण्यपक्षानंकिनेति। मूलेपीतत्वंशुक्लत्वाभावः। शंखत्वादौ श्वैत्यादिव्याप्तिज्ञानतः शंखादौ दोषविशेषादशुक्लत्वग्रहेपि शंखत्वादिहेतु
नातत्रश्वैत्याद्यनुमितेरानुभविकत्वादित्यर्थः। अत्र विशेषदर्शनेन साध्याभावनिश्चयेः मात्वंगृह्यतइति ऊर्ध्वं चं अगृह्यमाण्यविशेषणस्थलत्वात् अ
तोभावंपूरयति तथाचेति। साध्याभाववत्ताज्ञाने प्रमात्वज्ञाने विशेषदर्शनसत्वे च प्रतिबंधनिर्वाहायन त्प्रमात्वज्ञानाभाववत्वे न विशेषदर्शनस्याविशे
षणीयतापत्तिः। प्रमात्वज्ञानसत्त्वेन विशेषदर्शनेन विशेषिसाध्याभावनिश्चयेः प्रामाण्यज्ञानजननासंभवादिति गौरवमित्यर्थः। मूलेवादिवाक्ये

ग०टी०

५

नेतिसिद्धांते तत्रप्रमात्वज्ञानाभावान्नोच्छेदः। इतिज्ञानमिति प्रमात्वनिश्चयः स्वतो दूषकं। साक्षात्प्रतिबंधकं। वस्तुतस्तु साध्याभावे साध्यादेरुद्ग
हे रागमात्रार्थत्वात् तदनभिधानं अत एवाग्रेऽर्थनिश्चय इति सामान्यतो मूलसंगतिः ज्ञानमात्रादर्थनिश्चये इत्येतद्दूषणाद्द्वयपोजनाया स्तुय
गमद्वयपदतया योजयति प्रमात्वनिश्चये इति मूले ज्ञानपदं कारणस्यु जं तमित्याह ज्ञानहेतो रिति। अर्थनिश्चये भ्युपगते इति योजना। प्रामाण्यग्र
हवैयर्थ्यमिति मूलमसंगतं तदनपेक्ष्य तोपि अगृहीतप्रामाण्यकयाहृत्यादि फलवत्तया वैयर्थ्यासिद्धत्वादतो व्याचष्टे तदुपाये इति। किमर्थं प्रामाण्यग्र
होपायो विशेषणीय इत्यर्थः। क्वापि प्रामाण्यनिश्चयानपेक्षणादिति भावः। अर्थनिश्चयप्रसंग इति मूलमसंगतं कथंचिदुपपन्नोपि निश्चय इत्यस्यव्यधा
नात् अतो व्याचष्टे तत्कार्ये इति। भ्रमत्वे न ज्ञानादिति मूले भ्रमत्वज्ञानयोरुपतारूपेष्टापत्तिवारकहेतुगर्भे अप्रामाण्यज्ञानाभावविशिष्टत्वं तु न तत्स
संगवाहकं। प्राचीनमते प्रमात्वनिश्चयस्यैव तथात्वात्। प्रकृते पक्षे साध्याभावनिश्चयो व्यभिचारनिश्चयरूपः तन्नोपजीव्यः बाधनिश्चय इत्याह मूले
तथा चेति। गाः च सत्साध्याभावज्ञाने प्रामाण्यसंशयस्थले तत्त्विरहस्थले प्रमात्वनिश्चयस्योपजीव्यत्वासंभवात्। वउव्रीहीति सर्वत्राविप्र
मात्वनिश्चयस्य निश्चयकार्यकारित्वप्रयोजकत्वं स्यात् एवं न त्वधिकबलकत्वात्। तथा सति तत्र प्रमात्वज्ञानानां तदायेक्षापन्नेरिति भावः। अपेक्षा राम
यामेवेत्येवकारेण प्रामाण्यनिश्चयस्य व्यवच्छेदः। अपेक्षा अवश्यं स्वीकारः। हेतुतयाप्रयोजकतया न तु भ०। ये उपजीव्यत्वाधिकबलरूपत्वरूपहेतुद्वया ५
न्वयिः। तज्ज्ञानाभावे इति पाठांतरे। एतच्चाधिकबलरूपत्वेनैतावन्मात्रस्यैरीधितो प्रदर्शनात् तन्मात्रे पूर्णताभ्रमवृद्धास्ताया प्रमात्वनिश्चयो व्यभिचार्

निश्चयनिर्वाहक इत्युक्तं। उपजीव्यतापक्षयावत्संगताव्यधिकवलरूपतापक्षावसंगतिरितो व्याचष्टे साध्याभावांशे इति। निश्चयत्वमुपजीव्यतापक्षे
। प्रामाण्ये निश्चयं विना साध्याभावनिश्चयत्वानिर्वाहात्। निश्चिते साध्ये हि इति पक्षे तं विना निश्चयकार्यकारित्वासंभवात् उभयथापीति मूलस्यो
पजीव्यत्वाधिकवलरूपत्वरूपपक्षद्वयेपीत्यर्थः। तन्निर्वाह्यत्वं रूपविशेषणं। पौनरुक्त्यं परिहरति तच्चेति ज्ञानयोः प्रामाण्यनिश्चयसाध्याभावनिश्चययोः
। क्रमिकत्वं पूर्वज्ञातमित्येतल्लभ्यं। एतदुपादानं च व्यभिचारज्ञानस्यैव तादृशप्रामाण्यज्ञानत्वेवाधकस्य सत्त्वेन हेत्वाभासता न स्यात् उपजीव्यत्वाद्यभावा
दिति शंकावारणाय स्वरूपे साध्याभावनिश्चयात्मकव्यभिचारज्ञानस्वरूपे। प्रतिबंधकत्वे अनुमितिप्रतिबंधरूपनिश्चयकार्यकारित्वे। पौनरुक्त्यभ्र
मं निरस्यति एतच्चेति। मूले परिभूषत्वकार्यविरोधिनं कृत्वा। पर्वते इति तत्र पक्षे साध्याभावभ्रमाविरहाद् वह्निव्याप्यत्वेन किं तर्हि तादृशमित्याशंकायां
व्यभिचारज्ञानमित्याह वह्निं लिविति। क्रमत्वात्। पक्षभिन्ने व्यभिचारज्ञानत्वेन प्रतिबंधकताया आवश्यकत्वात्। साध्याभावनिश्चयं साध्याभावांशे निश्चि
तप्रामाण्यकत्वं तदधीनत्वविशिष्टतन्निश्चयत्वं वा व्यभिचारज्ञानस्य कुर्वत् संपादयत् तस्यैवैतस्यैव कारो व्यभिचारज्ञानसमुच्चायकः। अव्यर्थकत्वा
त्। अननुभवं दर्शयति। शाब्दादाविति साध्याभावप्रमायाः हेतुनिष्ठसाध्याभावभ्रमाविषयवृत्तित्वस्य। एतन्निश्चयस्यानुमितौ पृथक्प्रतिबंधकत्वप्रसा
धारणत्वेनैतस्यानेनोक्तं। साधारण्येपीति साध्याभावभ्रमात्रं दोषः तन्निष्ठायाः तज्ज्ञाननिष्ठायाः प्रतिबंधकतायाः शाब्दबोधादिसाधारण्येपीत्यर्थः। अनुमि
तिमात्रप्रतिबंधकताघटितलक्षणं तत्रोपपादयति ज्ञातप्रमाणमिति। ग्राह्यग्रे प्रमात्वज्ञानस्येत्यादिमूले तु मतत्वग्रहे इति प्रमात्वघटकतया पक्षे निर्धर्मिता

वच्छेदकसाध्याभावग्रहेऽपि पक्षतावच्छेदकविशिष्टे साध्याभावग्रहस्यानावश्यकतया पक्षतावच्छेदकविशिष्टे हेतुमत्ताज्ञानेऽपि येन रूपेण साध्या
भावग्रहस्तद्रूपविशिष्टधर्मे वृत्तित्वेन साध्याभाववद्वृत्तित्वेन वा हेतोर्न धीरिति व्यभिचारज्ञानासंभवादित्यर्थः। पक्षनिष्ठेति साध्याभावसमाना
धिकरणपक्षनिष्ठविषयतानिरूपितसाध्याभावप्रकारतानिरूपकत्वं साध्याभावज्ञानप्रमात्वं तेन ह्रदपक्षकवह्न्यनुमितिविरोधितायां वह्न्यभावव
ति वह्न्यभावप्रकारकत्वादिरूपप्रमात्वमात्रं न तंत्रं वह्न्यभाववति किंचिद्वह्न्यभावप्रकारकं यज्ज्ञानं ह्रदे इति ज्ञानेऽपि ह्रदो वह्निमानित्यनुमित्युत्पत्तेः तादृ
शप्रमात्वग्रहस्य ह्रदांशेऽभ्रमत्वग्रहाविरोधित्वात् अतो ह्रदांशे वह्न्यभावप्रमात्वज्ञानमनुमितिविरोधि वाच्यं तादृशप्रमात्वं च वह्न्यभाववति ह्रदे वह्न्य
भावप्रकारकत्वं तज्ज्ञाने ह्रदे वह्न्यभावभानस्यावश्यकतया तत्र हेतुमत्ताज्ञाने व्यभिचारज्ञानसत्त्वमनपवादमिति दूषणानवकाशः। संशयविरोधित्वा
दिति। ननु सामानाधिकरण्यग्रहे सामानाधिकरण्यप्रकारेण सामानाधिकरण्यग्रह एव प्रतिबंधकः समुच्चयस्यैकधर्मिणि संसर्गद्वयस्य संसर्गतया
भानाद्विरोधभानाविरोधितया समुच्चयो भवं समुच्चयोऽस्त्वन्यथा तस्य कोटिद्वयसंसर्गभानाविरोधितया च संशयविरोधित्वासंभवादिति चेन्न। एकधर्मिणि
संसर्गद्वयभानस्थले एकतरसंसर्गितया भासमानधर्मिणि अपरसंसर्गभानमपि विरोधिताप्रयोजकमिति मतेन तदभिधानात्। अन्यथा पुनः समु
च्चयोत्तरं संशय इष्ट एव। अत एव व्याप्यवृत्तित्वज्ञानाभावविशिष्टग्राह्याभावज्ञानस्य प्रतिबंधकतामतेऽपि समुच्चयोत्तरं संशयः संगच्छते। अनुभव एम॰
मनुसृत्याह भवन्तु वेति। समुच्चये एककोटिभानविरोधिनो विपरीतकोटिग्रहस्य कार्यकाले सत्त्वेन कोटिद्वयभानासंभवात् तत्र ग्राह्याप्रकारकत्वरूपप्र ६

तिबंधकतावच्छेदकविरहस्य प्रतिबंधकताविरहाधीनत्वया प्रतिबंधकाभावाप्रयोजकत्वेस्यतोऽव्याप्यवृत्तित्वज्ञानाभावनिवेशः। एवं चाव्याप्यवृत्ति
त्वज्ञानकालीनस्य समुच्चयात्मकबाधग्रहस्याप्रतिबंधकत्वमिष्टमेव। तद्धर्मिकग्राह्याभावनिश्चयप्रतिबंधकतायां तद्धर्मिरूपावच्छेदकभेदेन ग्रा
ह्यसामानाधिकरण्यरूपाव्याप्यवृत्तित्वग्रह एवोत्तेजकः। तेन द्रव्ये संयोगतदभावयोर्व्याप्यवृत्तित्वग्रहदशायां गुणादौ संयोगाभावस्य गुणादौ संयोगव
त्ताज्ञानविरोधितानिर्वाहः। न च भावाभावसामानाधिकरण्यग्रहेऽव्याप्यवृत्तित्वग्रहापेक्षा पामरस्याप्यहनि। वृक्षग्रहस्यापि भावाभावसामानाधिकरण्यग्र
हरूपतयाऽव्याप्यवृत्तित्वग्रहसापेक्षत्वेनानवस्थेति वाच्यम्। अवच्छेदकभेदेन तद्धर्मिभावाभावसामानाधिकरण्यग्रह एवाव्याप्यवृत्तित्वग्रहापेक्षणा
त्। वृक्षनिष्ठेति। अथ गुणादौ संयोगाभावस्याव्याप्यवृत्तिताग्रहदशायां गुणादौ तद्ग्रहस्य तत्र संयोगानुमितिविरोधितया तन्निष्ठसंयोगाभावादाव
व्याप्तिः। मैवं। सामान्यलक्षणादौ भ्रमाभावविशिष्टत्वेन निश्चयविशेषणात्। गुणः संयोगीत्यनुमितावव्याप्यवृत्तित्वभ्रमविशिष्टस्यैवाप्रतिबंधकत्वेन
तदभावविशिष्टतादृशनिश्चयसामान्यस्यानुमितिविरोधितयानाव्याप्तिः। द्रव्ये संयोगाभावग्रहस्याव्याप्यवृत्तित्वग्रहकालीनस्याप्रतिबंधकत्वान्नाति
व्याप्तिः। न च भ्रमकालीननिश्चयस्याविरोधित्वाददोषत्वं। अप्रामाण्यभ्रमकालीनदोषनिश्चयानामप्यविरोधित्वाद्दोषमात्रोच्छेदापत्तेः। अथात्रास्तु प्रति
योगिवैयधिकरण्यविशिष्टसाध्याभावग्रह एव प्रतिबंधकः। अत एव समुच्चये प्रतियोगिवैयधिकरण्यमानविरोधिनोऽव्याप्यवृत्तित्वग्रहस्यापेक्षा इत्थं
च द्रव्यनिष्ठसंयोगाद्यभावस्य प्रतियोगिवैयधिकरण्यरूपविशेषणावच्छिन्नत्वाभानदोषत्वेऽपि चेन्न। घटोद्यत्वाभाववान्निसादौ घटादेर्द्रव्यत्वादिमन्यस्य

ग०टी० बाधत्वं न स्यात् । तन्निष्ठद्रव्यत्वादेर्नित्यत्वविशिष्टद्रव्यत्वाद्यभावरूपप्रतियोगिवैयधिकरण्यात् ग्राह्यतावच्छेदकरूपेण प्रतियोगिनिवेशे च तत्तद्धर्मा
७ वच्छिन्नवत्त्वदवैशिष्ट्यरूपप्रतियोगिवैयधिकरण्यावगाहनेनैव तत्तद्धर्मावच्छिन्नविशिष्टबुद्धिप्रतिबंधसंभवात् । साध्याभाववत्त्वावच्छिन्नावगाहि
त्वस्योदासीनतया तादृशविशिष्टस्य दोषत्वानुपपत्तेरिति । अत्र ग्राह्याभावनिश्चयस्योत्पत्तिदशायां पूर्वोपस्थितप्रकृतकोपमानप्रयोजकं किमि
1 ति तु न शंक्यं । लौकिकसन्निकर्षघटितविपरीतभ्रमसामग्र्याः दोषविशेषघटितविपरीतभ्रमसामग्र्याश्च प्रकृतकोटिग्राहकसामग्र्यभावासाहित्ये नै
वमकृतकोटिग्रहप्रतिबंधकत्वात् । कोटिद्वयज्ञानघटितसामग्र्याः लौकिकसन्निकर्षाघटितत्वे न तुल्यबलतयाः विरोधेन तत्र संशयस्यैवोत्पादात् । के
चित्तु अग्राह्यवृत्तित्वभ्रमानात्मकं दितनिश्चयवृत्तित्वविशिष्टं यादृशविशिष्टविषयितासामान्यमनुमितिप्रतिबंधकतानतिरिक्तवृत्तितादृशविशिष्टत्वं दो
षत्वं । साध्यवत्पक्षकारणतायानतिरिक्तवृत्तित्वनिवेशः । न च साध्यवत्पक्षविषयितानवच्छिन्नप्रतिबंधकतैव निवेश्यतां तथापि साध्यव्यापकीभूताभावप्र
तियोगित्वे हेतुमत्त्वरूपासाधारण्यैकदेशे हेतुमत्पक्षेऽतिव्याप्तेः । तद्विषयितासामान्यस्य निश्चयविशिष्टनिश्चयत्वावच्छिन्नप्रतिबंधकतावच्छेदकत्वा
त् । अथैवं प्रतिबंधकतानतिरिक्तवृत्तित्वं यादृशविशिष्टविषयितात्वव्यापकमिति पर्यवसन्नं तथा च यादृशविशिष्टविषयित्वस्य निश्चयवृत्तित्वविशि
ष्टस्य विशेष्यीभूततादृशविषयितानतिरिक्ततया तस्य प्रतिबंधकताशून्यसंशयादिवृत्तित्वात् । मैवं । तादृशनिश्चयवृत्तित्वविशिष्टयादृशविशिष्ट राम०
विषयितात्वं प्रकृतानुमितिप्रतिबंधकताशून्यनिष्ठाधिकरणतानवच्छेदकतादृशानिश्चयवृत्तित्वविशिष्टयादृशविशिष्टविषयित्वव्यापकं वा प्रकृ ७

तानुमितिप्रतिबंधकत्वं तादृशस्योक्तत्वात्। एतेनाव्याप्यवृत्तित्वज्ञानकालीनसमुच्चये कोटिद्वयेपि [illegible] व्याप्यवृत्तित्वस्य मानाद्व्याप्यवृत्तित्ववि शि
ष्टकोटिद्वयावगाहिसंशयप्रतिबंधकताया अन्यथोपपन्नत्वात् तन्मात्रविषयस्य विषयविशेषीयबाधस्यानल्पत्वापत्तिरित्यपास्तं। तादृशस्य त्वे माना
भावात्। तथा चानवच्छिन्नत्वादृतेः तस्य पक्षतिघटकसाध्याभाववत्त्वस्यापि लक्ष्यत्वं उपरि मित्सात्तदृशसत्ता। विशिष्टांतरघटितत्वेन पक्षनिष्ठानवच्छिन्नसा
ध्याभाववत्त्वस्यालक्ष्यतापातात्। एवमिति पक्षतावच्छेदकावच्छेदेन साध्याभाववत्त्वस्यालक्ष्यतापत्तेदनभिधानं। यत्र चेति पक्षतावच्छेदकसामानाधि
करण्येन साध्याभाववत्त्वस्य प्रतिबंधकत्वानविषयत्वादनुक्तिः। इति विशेषइति बाधस्य पक्षतावच्छेदकनियंत्रितदोषत्वसूचकं। एतेन तद्धर्मावच्छि
न्नतद्रूपे विशेष्यकानुमितौ तादृशसाध्याभावग्रहस्य प्रतिबंधकत्वे निर्बाधस्य तद्धर्मिविशेषनियंत्रितमेव दोषत्वं। पक्षतावच्छेदकावच्छेदेनानुमितौ त
द्धर्मिकांतस्सकलव्यक्तीनामेव विषयतया सामानाधिकरण्यमात्रेण बाधग्रहस्याविरोधित्वात्तन्नैवांशतो बाधस्य दोषतेति प्राचां मतमनादेयं। पा
र्थिवगंधमात्रं जलावृत्तीसाध्यवच्छेदकावच्छेदेन ग्राह्याभावनिश्चयसत्त्वे गंधत्वादिसामानाधिकरण्यमात्रेण जलवृत्तित्वादेः संशयवदनुमित्यादे
रप्युत्पत्त्या तदनुपपत्तेः यत्र गंधादेरेव परामर्शविषयतात्र गंधत्वादिना अगंधादिमानस्य वक्तुमशक्यत्वात्। न च भवन्मते शुद्धगंधत्वसामानाधिक
रण्येन जलवृत्तित्वग्रहं प्रति तदवच्छेदेन जलावृत्तित्वग्रहवत् पार्थिवगंधत्वावच्छेदेन तद्ग्रहः कुतो न प्रतिबंधक इति वाच्यं। पार्थिवगंधत्वव्यापकता
भाने पार्थिवत्वव्यापकतापार्थिवगंधत्वसमानाधिकरणाभावप्रतियोगितात्वपर्याप्तत्वस्याभावप्रतियोगितावच्छेदकत्वेभानात् शुद्धगंधत्वव्यापकता

ग० टी० भामे च तद्विलक्षणतायाः पार्थिवत्वाद्यटितधर्मनिष्ठपर्याप्तेरवगाहनेनाधिकं त्विति न्यायानवतारात् । गंधत्वावच्छेदेन जलत्ववृत्तित्वग्रहे तत्सामाना-
८ धिकरण्येन जलत्ववृत्तित्वग्रहस्येव पार्थिवत्वादिविशिष्टगंधत्वाद्यवच्छेदेन तत्सामानाधिकरण्येन च तद्ग्रहस्याधिकं त्विति न्यायेन प्रतिबंधकत्वादि-
दं तु बोध्यं । धर्मितावच्छेदकसामानाधिकरण्येन वन्ह्यनुमाने साध्याभाववत्पक्षतावच्छेदकव्यापकत्वमेव दोषः ह्रदत्वव्यापको वन्ह्यभाव इत्येतज्ज्ञा-
4 नमात्रज्ञानेऽपि ह्रदो वह्निमानिति ज्ञानानुदयात् । न तु पक्षस्य पक्षस्य पक्षतावच्छेदकव्यापकसाध्याभाववत्त्वं तत्र पक्षस्य साध्याभावावगाहितायाः सामाना-
धिकरण्यमात्रावगाह्यप्रतिबंधकधीसाधारण्यात् तथाविशेषितायाम् अनुपयोगात् । न च पक्षः साध्याभाववानिति ज्ञानस्य प्रतिबंधकताया अनुभवि-
कत्वाद्व्यापकताया अनुपस्थितावनापत्त्यासंसर्गत्वमुपेयं तत्र साध्याभावांशे तस्याः पक्षतावच्छेदकसंबंधत्वं न संभवति तदंशे पक्षतावच्छेदकस्य
नियमतः प्रकारतापत्तेरिति तस्याः साध्याभावीयसंसर्गे अवच्छेदकतया भानस्वीकार्यं तथा च साध्याभावेऽवच्छेदकव्यापकताग्रहः प्रतिबंधक-
तयाः अनुमितिवारणासंभवादवच्छेदकव्यापकताविशिष्टविशेषणतादिसंसर्गेण पक्षांशे साध्याभाववत्ताग्रहस्य पृथगेव प्रतिबंधकताया आ-
वश्यकतया तद्विषयस्य दोषत्वं दुर्वारमिति वाच्यं । धर्मिपारतंत्र्येण धर्मितावच्छेदकस्य साध्याभावांशे तद्व्यापकतासंबंधेन प्रकारत्वस्योचितत्वात् । अ- रा म०
न्यथा विशेषणतात्वादिना साध्याभावीयविशेषणतायाः पर्वतत्वादिव्यापकतया पर्वतो निर्वह्निरित्यादेः प्रमात्वापत्तेरिति साध्याभावीयविशेषणता-
तात्वादिना व्यापकताभानस्यांगीकरणीयतया साध्याभावत्वेन यद्व्यापकतातद्वत्साध्याभावीयविशेषणतात्वेन संबंधताया एवौचित्येन गौरवात् । ८

न चावच्छेदकावच्छेदेन साध्याभावग्रहस्य ग्राह्याभावांशे व्यापकतावगाहित्वे नैव प्रतिबंधकत्वे धर्मिणि भासमानग्राह्याभावांशे निश्चयत्वं नोपपद्ये
त धर्मिणि साध्याभावांशे संशयस्यापि साध्याभावे व्यापकतांशे संशयत्वेन विरोधित्वादिति वाच्यं। ग्राह्याभावांशे धर्मितावच्छेदकव्यापकतानिश्च
यस्य धर्मिनिष्ठग्राह्यरूपाभावप्रतियोगितात्मकतद्व्यापकताभानस्य धर्मिणि ग्राह्याभावप्रतियोगिग्राह्यमात्रमानाविशेषाद्धर्मिणि ग्राह्यभानस्या
पि विरोधितया व्यापकताघटितसंबंधेन धर्मिणि ग्राह्याभावावगाहितापर्यंतस्यैव तादृशग्राह्याग्रहविरोधित्वादनुपयुक्तत्वात्। अथावच्छेदकावच्छे
देन विशिष्टबुद्धौ विशेषणे अवच्छेदकस्य व्यापकतासंबंधेन प्रकारत्वे घटो द्रव्यमिति ज्ञानस्य घटो न द्रव्यमिति सामानाधिकरण्येन स्वरूपतो भासमा
न द्रव्यत्वाद्यवच्छिन्नभेदबुद्धेः प्रतिबंधकत्वापत्तिः। घटो जातिमानिति बुद्धेः प्रतिबध्यत्वार्थं विशेषणानवच्छिन्नद्रव्यत्वादिप्रकारताया एवावच्छेद
कत्वात् मैवं। इतरविशेषणतानापन्नविशेषणानवच्छिन्नप्रकारताया एवावच्छेदकत्वात्। न तु पर्याप्तिनिवेशोऽवच्छेदकावच्छेदेन बुद्धौ विशेषणासंबं
धेऽवच्छेदकावच्छिन्नतीयत्वविशिष्टविशेषणीयत्वस्यावच्छेदकावच्छिन्नत्वस्यैवाभानेन संयोगसमवायादिषु संसर्गताया विशेषणीयसंसर्गताया
निरूपितत्वात्। केवलसंयोगादिसंबंधावच्छिन्नवन्त्याद्यभावस्य तद्विशिष्टसंयोगादिपर्याप्तप्रतियोगितावच्छेदकताकत्वविरहेण तद्रूपदादेर्बोधत्वानुप
पत्तिरत आह धर्मितेति साक्षादिति। तत्र संयोगादावेव संसर्गताव्यापकतायां तु तदवच्छेदकतारूपविलक्षणविषयतेति संसर्गतांतरानिरूपितत्वं त
स्यानुमसत्तां। परंपरासंबंधस्थले च परंपराघटकानां सर्वेषामेव मिथो विशेष्यविशेषणभावापन्नानां विशेष्यविशेषणसंबंधतया सर्वस्याएव संसर्ग

ग॰ टी॰ तायाः अपरसंसर्गतानिरूपितत्वेन तज्ज्ञानमात्रत्वेः। केवलसंयोगादेः संसर्गत्वे च संयोगत्वाद्यवच्छेदकत्वे च न तु संसर्गतेति सोपिशब्दात्संबंध एवा
९ यत्तु संयोगादेः स्वतोऽप्यावृत्तेस्तस्यैव संसर्गतया भानं न तु संयोगत्वादिनेति मतं तन्न संयोगत्वानवच्छिन्नसंयोगसंसर्गकघटवत्ताबुद्धिप्रतिसंयोगत्वेन संयो
गं प्रतियोगितावच्छेदकतया। वगाहमानायाघटो नास्तीति बुद्धेः प्रतिबंधकत्वाभावापत्तेः। जातिविशेषवान्नास्तीति बुद्धेः स्वरूपतो घटत्वविशिष्टबुद्ध्यवि
9 रोधित्वेन यादृशाविषयाभेदप्रयुक्तो ज्ञानयोः प्रतिबध्यप्रतिबंधकभावस्तद्विषयताया उक्तवैलक्षण्यापरिग्रहस्य प्रतिबध्यप्रतिबंधकभावेऽतंत्रत्वाद्विप
रीतज्ञाने अभावप्रतियोगितावच्छेदकतया भासमानसंबंधेन स्वसंबंधाभेदस्य प्रतिबध्यप्रतिबंधकभावप्रयोजकतायाश्चावश्यकत्वात् अन्यथास
मवायादिसंसर्गज्ञानसंयोगादिसंबंधावच्छिन्नाभावज्ञानयोरविरोधे किं बीजं स्यात्। न चाभावज्ञानेपि प्रतियोगितावच्छेदकतया संयोगः स्वरूपत एव भा
सते न संयोगत्वेनेति नानुपपत्तिरिति वाच्यं। संयोगसमवायाद्युभयसंबंधावच्छिन्नाभावस्य संयोगसंबंधेन प्रतियोगिमत्ताविरोधितया संयोगत्वेन सं
योगस्याभावप्रतियोगितावच्छेदकतया एवाभावप्रतियोगिरूपविषयविरोधबीजतया। नापत्स्यात् ज्ञानस्यैव संयोगेन घटादिमत्ताज्ञानविरोधिताबीज
तयासंयोगावच्छिन्नप्रतियोगितायाः संसर्गतयाभानेपि संयोगत्वेन संयोगभानस्यावश्यकत्वात्। संयोगपर्याप्तप्रतियोगितावच्छेदकताकेति लिखनं
च संयोगत्वाद्यवच्छिन्नानवच्छिन्नप्रतियोगिताकत्वमिति तन्नापि संयोगत्वेन संयोगभानमावश्यकं। यदि चैकविषयनिष्ठप्रकारतयोरपि वैलक्षण्यं प्रति रा म॰
बध्यप्रतिबंधकभावेऽतंत्रं न तु संसर्गताया इति मन्यते तथापि प्रतिबंधकताभेऽभावप्रतियोगितावच्छेदकतया यस्य ज्ञानं प्रतिबध्यतानेया स्य संसर्गतया ९

तस्समानापेक्षायां पत्रैकासंयोगव्यक्तिरभाववज्ज्ञाने प्रतियोगितावच्छेदकत्वेन विषयः अयद्वत्संयोगव्यक्तिर्यत्र संसर्गतया प्रतिवध्यज्ञाने तयोः प्रतिवध्य
तिवंधकभावानुपपत्तेः संवंधविषयतयोरेकधर्मावच्छिन्नत्वमावश्यकं एकधर्मसामानाधिकरण्यस्य संयोगसमवायविषयतासाधारण्येनातंत्रत्वात्
। एवं विषयताकालिकविशेषणतादेः स्वरूपानतिरिक्ततया कालादौ ज्ञानादेः तादृशसंवंधस्यैकेन कालिकादिसंवंधेन कालादौ ज्ञानादिमत्ताबुद्धौ विष
यतासंवंधावच्छिन्नतदभाववत्ताज्ञानस्यापि प्रतिवंधकत्वापत्तिः तयोः संवंधयोः स्वरूपतोभानेन तद्विषयत्वाकैतवेलक्षण्याभावादिति विषयतात्वादि
नातत्तत्संवंधभानमावश्यकं। एवं संवंधकतावच्छेदकस्य विशिष्टबुद्धावभाने यत्र संयोगसमवायादिनानासंवंधेन घटादिविशिष्टपरतदादिघटि
तं तत्त्वमेयमित्यादिवाक्यं तत्रैव संयोगसंवंधेन घटत्वावच्छिन्नानाघटविशिष्टपरत्वघादपदघटितं यत्तादृशवाक्यं तत्रापि वाक्यार्थानुगमेन वाक्या
भेदापत्तिः। एतेन यद्रूपावच्छिन्नसंसर्गः प्रतियोगितावच्छेदकतयाभासते तद्रूपाश्रयसंवंधस्यैवाव्यज्ञाने संवंधतयाभानं प्रतिवध्यत्वे तंत्रमिति प्रत्युक्तं
। यत्तु संवंधतावच्छेदकधर्मोः विषयो वि अवच्छेदकीभूयप्रकारतावैलक्षण्यमुपपादयतीति तन्न। तथासति संवंधस्यैवावच्छेदकीभूयप्रकारतावैल
क्षण्योपपादकतासंभवाद्विषयत्वापत्तेः। केचित्तु साक्षात्संवंधनिष्ठैकविषयतैवप्रकारताविशेष्यतानिरूपिता परंपरासंवंधे तु प्रथमपदार्थविषय
ताविशेष्यतानिरूपिता चरमपदार्थविषयताप्रकारतानिरूपितेति वदंति। उक्तरीतिः अवच्छिन्नत्वघटनाप्रभृतिः। अपेक्षाध्यवदन्यत्वादिघटितवाधे
पु। पक्षतावच्छेदकफलं स्फुटं। समेति। अधिकरणताधेयतयोः संसर्गतयाभाने नशीलसामर्थ्यं। नव्यमतं दर्शयति वस्तुतस्त्विति संवंधावच्छिन्नविषयता

कत्वरूपप्रतिबध्यतावच्छेदकस्याप्यसत्त्वं दर्शयति संसर्गविषयेति। ईदृशानव्यमतसिद्धप्रतिबंधकत्वासंभवाद्ग्रेपि प्राचीनेत्यभिधास्यते। पक्षवृत्तित्वेन
विशिष्टइति अपमाधेयतया पक्षविशिष्यघटितइति प्रथमग्रदोषः। अत्रेवदंति पक्षेसाध्याभाववइतिसाध्यं पक्षनिष्ठाभावप्रतियोगीतिज्ञानयोः पक्षविशे
षिताभावप्रतियोगि। वविषयत्वानिरूपितसाध्यतावच्छेदकावच्छिन्नविषयताशालित्वेनैकरूपेणैव प्रतिबंधकत्वं। नचपक्षेसाध्याभाववइतिज्ञानेऽ
भावेः तुयोगित्वेन संबंधेन तत्प्रतियोगिताया तदवृत्तेरत्त्वासंबंधत्वादितिवाच्यं। साध्यतावच्छेदके प्रतियोगितावच्छेदकत्वभानस्येव विशेषितावीज
तया तत्राभावे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकानुयोगितायाएव संबंधत्वे प्रतियोगितायाअवश्यंभानात्। नचैवं तत्राभावविषयतासरूपिता
नुयोगित्वविषयतानिरूपितनिरूपितत्वविषयतानिरूपितप्रतियोगित्वविषयतासत्त्वात्साध्यं पक्षनिष्ठाभावप्रतियोगीतिज्ञानासंग्रहएवेतिवाच्यं। अ
भावस्यस्वतः सप्रतियोगिकत्वेमानाभावेनाभावत्वरूपानुयोगिताद्वारा तद्वाच्यं तथाच पक्षनिष्ठाभावप्रतियोगित्वं पक्षनिष्ठवृत्त्यभावत्वरूपानु
योगितानिरूपितप्रतियोगित्वमितिसाम्यं। नच प्रतियोगित्वस्यप्रकारतातत्र तत्संबंधभानादतिप्रसंगापत्त दीयसंबंधविषयतानिवेशआवश्य
कः तथाच पक्षेसाध्याभाववइतिज्ञानस्य तदविषयकतयानसंग्रहइतिवाच्यं। साध्यांशेप्रतियोगितासंबंधेनाभावप्रकारकस्याभावेसाध्यप्रकारकस्य
च ज्ञानस्यप्रतियोगितानुयोगित्वसांसर्गिकविषयिताघटितधर्मेणानुगमनीयत्वात्। साध्येप्रतियोगिताप्रकारकं अभावेऽनुयोगिताप्रकारकं चज्ञा
नस्वतोः विरोध्येवेति। अत्राहुः। संबंधस्वरूपोपः प्रदार्थो विशेषणा प्रतियोगिकः तदीयसांसर्गिकविषयतेव विशेषणाविषयतानिरूपिता तथाचप

शेषसाध्याभाववद्वृत्तिज्ञानेऽनुयोगित्वविषयतैव साध्यविशेषणतातानिरूपिता न तु प्रतियोगित्वविषयतेति अभावविशेष्यकसाध्यविशेष्यकज्ञानयोः पृथ
गेव मात्रं बंधकतासाध्यविशेष्यकज्ञानस्याप्रतिबंधकत्वं तु न सत्तविषयसाम्येन विनिगमकस्य दुर्लभत्वात्। आदिपदग्राह्याहन्ति ते साध्यसादिपद
ग्राह्यसाध्यसंबंधे पक्षावृत्तित्वस्यानन्वयोऽनुसत्तिविरोधादत आह आदिपदाभ्यामिति। अनिवेशादिति। अथ विशिष्टसाध्यविषयतापा अपि विशेष्य
विषयितात्वेन प्रतिबध्यतावच्छेदकतया स्वरूपसंबंधरूपावच्छेदकत्वोपादानेपि न विशेष्याभाववत्सत्वाद्व्याप्तिसंभवः। न च वह्नित्वावच्छिन्नप्रकारि
तात्वेन महानसीयवह्निविषयितायाअपि प्रतिबध्यतावच्छेदकतया महानसीयवन्यभाववद्वृत्तावतिव्याप्तिः। एवं पर्वतो वह्निघटवानिति ज्ञानीयवह्नि
त्वावच्छिन्नप्रकारितानिष्ठघटप्रकारितात्वावच्छिन्नप्रतिबध्यतावच्छेदकतामादाय घटाभाववत्सर्वतेऽतिव्याप्तिः तादृशसाध्यतावच्छेदकावच्छिन्नप्रका
रितात्वेनावच्छेदकत्वं न शक्यते वा इयितुं विशेष्याभाववत्सत्ताव्याप्तेरिति वाच्यं। साध्यतावच्छेदकपर्याप्तप्रकारितावच्छेदकतानिवेशात्। विशिष्टे साध्य
के च विशिष्टसाध्यतावच्छेदकपर्याप्तनिरूपकतावच्छेदकतावत्प्रकारितायाविशेष्यतावच्छेदकावच्छिन्नप्रकारितात्वेनोपादानसंभवान्नाव्याप्तिः एवं वह्नि
मत्पर्वताभाववद्वृत्तेऽतिव्याप्तिः। देशविषयितानिरूपिततादृशपर्वतविषयित्वावच्छिन्नप्रतिबध्यतायाः पर्वतविषयितावच्छिन्नसाध्यप्रकारत्वावच्छिन्न
त्वात् अतः पक्षमुख्यविशेष्यतानिवेशस्तथापि वटाभाववद्वह्निमत्पर्वतादावतिव्याप्तिरतः प्रकारतानिष्ठावच्छेदकतायामनवच्छेदकतातानवच्छिन्नत्वं नि
वेश्यं। न च तथापि वह्निप्रकारकप्रत्यक्षं प्रति धूमव्याप्यवत्तानिश्चयस्य भिन्नविषयकानुमितिसामग्रीविधया प्रतिबंधकताद्धूमादिव्याप्यवत्सत्वेऽतिव्याप्तिरि

ग॰टी॰ तिवाच्यं। सामग्रीघटकयत्किंचित्कारणासमानकालीननिश्चयसाधारणतद्विषयितायाः प्रतिबंधकतातिरिक्तेः इतित्वादितिमेवांदं ऽ विशिष्टपु
११ रुपसाध्यकेपरंपरासंबंधावच्छिन्नदंगभाववत्पक्षोपिवाधः सामान्यलक्षणाक्रांतत्वात्तदंगभावप्रतियोगितावच्छेदकतापर्याप्तिदं ऽ विशिष्टपुरु
षाभावप्रतियोगितावच्छेदकतापर्याप्तोविलक्षणत्वादृं ऽ विशिष्टपुरुषाभाववत्पक्षस्यविशिष्टांतराघटितत्वं तथाच तत्राव्याप्तिभयेन स्वरूपसं
बंधरूपावच्छेदकतानिवेशप्रतिक्षेपइति। केचित्तु पर्वतोवह्निमानित्यादौ वह्निघटोभयाभाववत्पर्वतेः तिव्याप्तिः पर्वतोवह्निघटवानितिज्ञानेवंह्नित्वा
वच्छिन्नप्रकारतावच्छिन्नप्रतिबध्यतासत्वात्। साध्यप्रकारित्वेन तत्प्रकारित्वानवच्छिन्नत्वनिवेशेच गौरवमित्याहुः। अपरेतु प्रकारतायाः प्रकार
रुपत्वाभतेपर्वतेवह्नेः साध्यत्वे महानसीयवन्ह्यभाववत्पक्षेः तिव्याप्तिः वह्नित्वपर्याप्तावच्छेदकताकप्रकारताया अपि महानसीयवन्ह्यात्मकम
हानसीयवह्नित्वावच्छिन्नप्रकारतारूपत्वात्तदवच्छिन्ननिरूपितप्रतिबंधकतावच्छेदकविषयिताकत्वात्। यदितु पक्षेसाध्यवत्ताज्ञानत्वाव्यापकवि
षयिताशून्यग्रहं प्रतियादृशविशिष्टविषयकत्वेन प्रतिबंधकत्वं तादृशमितिच्यते तदाप्रतिबंधकतायांसत्त्वाजिपक्षविषयितानवच्छिन्नत्वमेवनि
वेश्यं नतु पक्षसाध्यवैशिष्ट्यावगाहिग्रहत्वव्यापकत्वमेवनिवेश्यमित्याहुः। पत्तुपर्वतह्रदौ वह्निमत्ताविरहादात्तुभयविशेष्यतानिरूपितप्रकारतायाऐका राम॰
त्पर्वतविशेष्यकसाध्यप्रकारितायाएवह्रदविशेष्यकसाध्यप्रकारितात्वेनावच्छेदकतयाव्यन्ह्यभाववद्ध्रदेःतिव्याप्तिरतः स्वरूपसंबंधरूपावच्छेदकत्व ११
स्यागइतितन्न। समासनिबंधनशाब्दबोधेतादृशविषयितायाः सत्वेपिसत्तावच्छेदकपर्याप्तावच्छेदकताकत्वाभावेन तदसंग्रहात्। अतेजस्यीयपर्वतोवह्नि

मानित्यादिस्थलीयबाधानुरोधेन तत्स्पर्यामेरावश्यकत्वादन्यथा सामान्यनिरुक्तौ पि तत्रातिप्रसंगापातात्। परे तु प्रकृतपक्षविशेष्यतानिरूपितसाध्यताव
च्छेदकावच्छिन्नप्रकारताघटितधर्मावच्छिन्नायाः प्रकृतसाध्यप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताघटितधर्मावच्छिन्नाया वा प्रतिबध्यता
यानिवेशः। आद्यामुपादाय साध्याप्रसिद्धावतिव्याप्तिः प्रकारताया विशेष्यतात्वेन तज्ज्ञानप्रतिबध्यतात्। द्वितीयामुपादाय पक्षाप्रसिद्धावतिव्याप्तिरतः क्रमेण
साध्यपक्षपदाविरोधित्वे विकल्पनोक्तनिरासाद्वः। आचार्यसंमतमस्तु कोऽस्माकं हानिमाहुः मणिकृतास्तितिज्ञानेस्वनेनाचार्यसंमतेऽज्ञद्भावः सूचितः। ननु विरोधित्वं
नप्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यग्रहप्रतिबंधकग्रहविषयत्वं पर्वतो नवह्निव्याप्यवानित्यादौ वह्निव्याप्यवत्पर्वतादावव्याप्तेः। तादृशग्रहप्रतिबंधकं पर्वतो
वह्निव्याप्यवान् वह्निमांश्चेति ज्ञानं तद्विषयवह्निमत्पर्वतो न व्यापकत्वात्। तादृशग्रहप्रतिबंधकतावच्छेदकविषयितावच्छिन्नानुमित्यप्रयोजकत्वोक्तावपि पर्व
तो वह्निव्याप्याभाववान् वन्ह्यभाववांश्चेति ग्रहमादाय तद्दोषतादवस्थ्यम् अत्र प्रकृतपक्षविशेष्यकप्रकृतसाध्यप्रकारकत्वावच्छिन्नप्रतिबध्यताया निवेशेपि व
ह्निव्याप्याभाववत्ववन्ह्यभाववत्वोभयरूपेणोभयप्रकारताया एकतया तद्दोषो न वार्यते तादृशसाध्यतावच्छिन्नप्रकारतात्वेन प्रतिबध्यतावच्छेदकताप्रवेशे तु वि
शिष्टसाध्यके विशेष्याभावव्याप्यवत्पक्षरूपसत्प्रतिपक्षेऽतिव्याप्तिर्दुर्वारैवेत्यत आहुः शेषमिति। तादृशग्रहत्वव्यापकप्रतिबध्यतानिवेशः कार्यः। प्रतिबंधक
तावच्छेदकविषयिताकविषयकनिष्ठजन्यताप्रवेशे तादृशविषयिताको वह्निव्याप्यवत्पर्वतादिस्तद्विषयकोक्तसमूहालंबनमादाय वह्निव्याप्यवत्पर्वतात्मक
बाधेऽव्याप्तिः तादृशविषयिताकनिरूपितविषयितावच्छिन्नजन्यतानिवेशांहेषा विषयितानिवेशप्रसंगस्यतः प्रतिबंधकतावच्छेदकविषयितावच्छिन्नज

न्यतानिवेशः कार्यः त्वद्भिव्याप्याभावसाध्यके वह्निव्याप्यवत्पक्षसंग्रहप्रकारश्चैवं वा विषयितानिवेशो नैवेति माऽस्तु । अविरोधित्वान्तस्येति । न च तत्र कांच
नमयत्वविशिष्टपक्षग्रहाविरोधित्वमेव निवेश्यमिति वाच्यं । तावतापि कांचनमयत्ववन्न्युभयवान् ह्रदो वह्निमानित्यादौ तादृशोभयाभाववद्ध्रदरूपासि
द्धिवारणाय तदुभयवत्ताग्रहाविरोधित्वस्यावश्यकतया तन्नाव्याप्तेः संभवात् वस्तुतस्तु तादृशोभयाभाववत्ताग्रहस्य प्रतिबध्यतावच्छेदककोटावु
भयत्वविषयतामनिवेश्योभयप्रकारता । निरूपितैकविशेष्यतायानिवेशाद्ध्रदाचार्यक्तिस्थल एवाव्याप्तिः । इति । उद्देश्यतेति उद्देश्यताविधेयतावच्छेदक
तादृशसाध्याधारतावच्छेदकतात्वेनैकनिसाशयेनेदं । अन्यथा पुनरवच्छेदकतान्यत्वमेव वस्यमप्कृ । अथ पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्य
तावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रकारितानिष्ठावच्छेदकताकप्रतिबध्यतानिरूपितप्रतिबंधकतानिवेशएव सम्यक् । अत्र तःपातिषा
तित्वांतस्योद्देश्यतावच्छेदकताघातदिक्तत्वस्य च वैयर्थ्यान्तात् । पतुह्रदः कांचनमयवह्निमानित्यादौ विशेष्यवन्न्यभाववद्ध्रदादावव्याप्तिः कांचनमयत्वघ
टितधर्मस्य बाधप्रतिबध्यतावच्छेदककोटावनिवेशादिति तादृशप्रयासस्यावश्यकत्वस्तु तन्न कांचनमयवह्नित्वावच्छिन्नप्रकारतायाः अपि वह्नित्वा
वच्छिन्नप्रकारतात्वेन बाधप्रतिबध्यतावच्छेदकत्वात् । न च कांचनमयत्वप्रकारतानिरूपितविशेष्यत्वह्रदत्वावच्छिन्नविशेष्यतानिरूपितवह्निप्रका
रतयोरभेदमते तादृशप्रकारतायाः अपि साध्याप्रसिद्धिज्ञानप्रतिबध्यतावच्छेदकतया साध्याप्रसिद्धिप्रतिव्याप्तिर्दुर्वारैवा न वाच्यं । प्रकारतायाः प्रकारतात्वे
न प्रतिबध्यतावच्छेदकत्वविवक्षणात् तावतापि पक्षग्रहाविरोधित्वदलवैयर्थ्यापत्तावाचेति चेन्न । उद्देश्यतावच्छेदकताविधेयतावच्छेदकतातिरिक्तविशि

ष्टविषयितानः पातिप्रकारताम्पक्षिमादाय लक्षणसमन्वयः कार्य इत्यभिप्रायेणेदं न तु लक्षणेऽपि तेन रूपेण निवेशः किंतु पक्षविशेष्यतानिरूपितसा
ध्यप्रकारिताकत्वेनैवेत्याहुः। परे तु प्रतिबंधकताघटितलक्षणे लाघवोपनीतकांचनमयत्वविशेषितवह्नित्वावच्छिन्नसाध्यकानुमितौ शुद्धवह्निव्याप्ति
ज्ञान्यायां कांचनमयत्वाभावविशिष्टवह्न्यादिरूपबाधे व्याप्तिः अन्यथा तत्र साध्याप्रसिद्धितस्याभावेन हेत्वाभासांतरतापत्तेः। यतः कांचनमयत्वस्य न
साध्यतावच्छेदकता किंतु प्रकारतावच्छेदकत्वेन तद्धर्मावच्छिन्नव्याप्तिज्ञानादनुमितित्वेनैव विधेयतावच्छेदकतास्वीकार इत्यस्याग्रे व्यक्तत्वात्। एतल्ल
क्षणाच्च तत्रापि लक्षणसमन्वय इत्यभिप्रायेण तत्तथा निवेशः। एवं कांचनमयान्यवर्त्तिनो निर्वह्निरित्यादौ तद्बाधकालीनशुद्धपर्वतविशेष्यकपरामर्शज
न्यायां कांचनमयपर्वतो वह्निमानित्यनुमितौ कांचनमयत्वाभाववत्पर्वतोऽपि बाधस्तत्रापि लक्षणसमन्वयः। यद्धर्मावच्छिन्नपक्षज्ञानादनुमितिस्तस्यैवो
द्देश्यतावच्छेदकत्वात्। वस्तुतस्तु दंडिपुरुषसाध्यके दंडाभावद्देशादिसंग्रहार्थं यथोक्तरीतिरेव सम्यक्। एतेन प्रकारतायामवच्छेदकत्वातिरिक्तत्व
विशेषणेनैव सामंजस्यात्कृतमुद्देश्यजेत्यादिनेत्यपि निरस्तं। उक्तबाधप्रतिबध्यतावच्छेदककोटिप्रविष्टकांचनमयत्वविषयतायाः प्रकारतावच्छेदकत्वेना
नवच्छेदकत्वातिरिक्तत्वाभावादिति ध्येयमित्याहुः। तथा चेति न तु तादृशप्रकारत्वावच्छिन्नप्रतिबंधकतानिरूपितप्रतिबध्यतावच्छेदकत्वमेवास्तु तथा
सति अनुमापकत्वं तद्दलस्यैव पर्य्याप्त्याघवात् न च ह्रदो वह्निमानित्यादौ सत्सति पक्षे इति व्याप्तिः वह्निमान् वन्ह्यभावव्याप्याभाववान् ह्रदश्च वह्निमानित्ये
तादृशनिश्चयस्यावच्छेदकधर्मदर्शनमुद्रया तद्ग्रहे प्रतिबंधकत्वादिति वाच्यं। प्रतिबंधकतायां ज्ञानवैशिष्ट्यानवच्छिन्नत्वनिवेशात्। न चैवमपि ह्रदे

वह्निव्याप्यकाष्ठके वन्ह्यभाववद्वृदेइतिव्याप्तिरिति वाच्यं तादृशप्रकारत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकत्वस्यापि निवेश्यत्वा
त्तानवेवमपि ह्रदो वन्ह्यभाववद्व्याप्याभाववद्व्याप्यवन्ह्यभयवान्निसादौ वन्ह्यभाववद्व्याप्यवद्ह्रदादावतिव्याप्तिः तद्विषयितायास्तत्तादृशवन्ह्यभाववद्व्या
प्याभाववद्व्याप्यप्रकारित्वावच्छिन्नप्रतिबंधकतानिरूपितप्रतिबध्यतावच्छेदकत्वात् तादृशवह्निप्रकारित्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधक
तावच्छेदकत्वाच्चेति वाच्यं यादृशविशिष्टविषयितात्वादृशप्रकारित्वावच्छिन्नप्रतिबंधकताविशिष्टतादृशत्वमिति पिवसरणात्। वैशिष्ट्यं च स्वनि
रूपितप्रतिबध्यतावच्छेदकत्वस्यावच्छेदकावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकत्वोभयसंबंधेनेति चेन्न साध्यासमानाधिकरण
धर्मवत्त्वस्यापर्यवसन्नेः। अथ जनकतायां साध्यवत्तानिश्चयप्रतिबध्यतावच्छेदकविषयितानवच्छिन्नत्वं जनकतावच्छेदकविषयितायां वा साध्यवत्ता
निश्चयत्वव्यापकप्रतिबंधकतानिरूपितप्रतिबध्यतानवच्छेदकत्वं निवेश्यं वह्निव्याप्याभाववन्ह्यभावोभयसाध्यकस्थलीयबाधसंभवात्तादृशजनक
तावच्छेदकान्यत्वमुपेक्ष्य गुरुतरशरीरं प्रतिबंधकतायास्तादृशजनकतावच्छेदकविषयिताभवच्छिन्नत्वं कुतो विवक्षितं सत्प्रतिपक्षज्ञानीयजनकताव
च्छेदकविषयितायाअपि साध्यवत्ताज्ञानप्रतिबध्यतानवच्छेदकत्वान्नातिव्याप्तिवरतिचेन्न। वह्निव्याप्याभाववन्ह्यभावोभयसाध्यके वह्निव्याप्यवत्त्वस
रूपसत्प्रतिपक्षातिव्याप्तेः तद्विषयितायाः वह्निव्याप्याभाववद्व्याप्यत्वकसाध्यनिश्चयप्रतिबध्यतावच्छेदकतया तदन्यजनकतावच्छेदकीभूतवह्निव्या
प्यव्याप्यवत्त्वर्वृत्तविषयितान्यत्वात्। उन्नायकतावच्छेदकविषयितायां साध्यवत्ताज्ञानप्रतिबंधकतानवच्छेदकत्वनिवेशे एतद्दोषवारणो दर्शितवा

धामान्निर्दुर्वारैवाप्यपपित्वनिरूपितप्रतिबध्यतावच्छेदकत्वस्यावच्छेदकावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकत्वोभयपर्यं वंधावच्छि
न्नत्वनिष्ठावच्छेदकताकभेदवत्त्वसंबंधेनसाध्यवत्तानिश्चयपत्वव्यापकप्रतिबंधकताविशिष्टजनकतावच्छेदकविषयितान्यत्वनिवेशेन पूर्वोक्तिप्रसंगः
शावंतेवारपितु तथापि लाघवेन पथोक्तार्थ एव विवक्षितः। अथ वन्ह्यभाववद्ह्रदादावसंभवः तादृशप्रतिबंधकतायाः जनकतावच्छेदकीभूतवन्ह्यभा
वव्याप्यवन्ह्यभाववत्ताज्ञानीयविषयितानवच्छिन्नत्वाभावात्। नच यादृशविशिष्टनिरूपिताविषयित्वं जनकतानतिरिक्तवृत्तितादृशविशिष्टविषयिता
भतिरिक्तवृत्तिकप्रतिबंधकतान्यत्वं निवेश्यमिति वाच्यं। बाधादिज्ञानप्रतिबंधकतायाः तादृशजनकतानतिरिक्तवृत्तिवन्ह्यभावव्याप्यवन्ह्यभावव
द्ह्रदादिविषयितानतिरिक्तवृत्तिकप्रतिबंधकतान्यत्वविरहेणासंभवस्य दुर्वारत्वादिति चेन्न। यद्रूपविषयितानिष्ठजनकतावच्छेदकतावच्छेदक
तापर्याप्त्यधिकरणंतद्रूपावच्छिन्नावच्छेदकत्वानिरूपकत्वस्योक्तत्वात्। नच सत्प्रतिपक्षस्थलीयव्याप्तिः विशिष्टवैशिष्ट्यावगाहिपरामर्शस्यैव जनक
तया सत्प्रतिपक्षविषयकत्वावच्छिन्नप्रतिबंधकत्वस्य साध्याभाववत्ताविशिष्टप्रतियोगिकवैशिष्ट्यावगाहि तद्व्यलक्षितयप्रतियोगिकवैशिष्ट्यावगा
हिज्ञानसाधारणतया तादृशजनकतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणं यद्विशिष्टवैशिष्ट्यावगाहित्वं तदवच्छिन्नावच्छेदकत्वानिरूप
कत्वात्। यदि च तादृशजनकतावच्छेदकतावच्छेदकतापर्याप्तिः प्रयोजनाभावान्न निवेश्यत इति नातिप्रसंगः इत्युच्यते तदा व्याप्तिविशिष्टहेतुतावच्छे
दकविशिष्टवैशिष्ट्यावगाहित्वस्य जनकतावच्छेदकतया तत्कोटौ बाधज्ञानप्रतिबंधकतावच्छेदकपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितप्र

तिहेतुतावच्छेदकीभूतसाध्याभावत्वावच्छिन्नप्रकारतात्वस्य निविशिष्टतया तदवच्छिन्नावच्छेदकत्वेनासंभव इति पर्यवसायकं त्वादिति वाच्यं
।विशिष्टवैशिष्ट्यावगाहित्वेन परामर्शस्य जनकतामते तथैव तादृशनिश्चयस्य प्रतिबंधकत्वादतिव्याप्त्यभावादिति। अथ तादृशांशः प्रतिप्रका
रत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकविषयिताकत्वनिवेशे उक्तरीत्या वह्निमत्पर्वताभाववद्देशेऽतिव्याप्तिः पक्षविशेष्यकसा
ध्यप्रकारकग्रहत्वव्यापकतावच्छेदकरूपपर्याप्तावच्छेदकतावच्छेदकताकत्वस्य प्रतिबध्यतायां निवेश इति चेत्। तादृशसाध्यवत्तांशग्रहत्वस्य लौ
किकदोषविशेषजन्यसाधारणत्वात्। प्रतिबध्यतावच्छेदकतायां स्वालौकिकदोषविशेषाजन्यसाध्यवत्ताज्ञानत्वे सत्वे मते तस्य तद्व्यापकत्वा
त्। न च तादृशपरोक्षग्रहत्वव्यापकतावच्छेदकत्वनिवेशान्न दोष इति वाच्यं। उद्देश्यताविधेयतावच्छेदकतातिरिक्तत्वानिवेशेनाप्रयासिद्ध्यापत्ते
व्याप्तेः। न चोद्देश्यतावच्छेदकताविधेयतावच्छेदकतातिरिक्तत्वविशिष्टयद्रूपं तादृशग्रहत्वव्यापकतावच्छेदकं तद्रूपपर्याप्तावच्छेदकतावच्छेदक
ताकत्वं विवक्षितमिति वाच्यं। तादृशग्रहत्वस्य वन्ह्यवच्छिन्नपर्वतोद्देश्यकघटादिप्रकारकज्ञानसाधारणतया तत्र तादृशविशिष्टधर्मावच्छिन्ना
भावप्रसक्त्या व्यापकताभंगादिति चेन्न। तादृशातिरिक्तत्वविशिष्टं यद्रूपं पक्षतावच्छेदकावच्छिन्नोद्देश्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नविधेय
ताशालिग्रहत्वव्यापकतावच्छेदकं तद्रूपपर्याप्तावच्छेदकताकत्वस्य प्रतिबध्यतायां निवेशान्न दोषः। कांचनमयपर्वतवान् वह्निमान् ह्रदो वह्निमानित्या एम॰ १४
दौ कांचनमयह्रदो वह्निमानित्यादौ च कांचनमयपर्वतवन्ह्युभयाभाववद्ध्रदादौ नातिव्याप्तिः। अथ वन्ह्यभाववान् ह्रदो वह्निमानित्यादौ वन्ह्यभाववत्त्वि

र्वह्निर्ह्रदात्मकबाधेव्याप्तिः प्रकृतपक्षे प्रकृतसाध्यप्रकारतायाः आहार्यज्ञानीयत्वेन प्रतिबध्यतानवच्छेदकत्वादिति यत्तु तादृशविषयतांतःपातिप्रका
रत्वाभावप्रयोजकत्वे सति स्वनिरूपितप्रयोज्यतावच्छेदकधर्मावच्छिन्नप्रयोज्यतानिरूपितप्रयोजकतावच्छेदकविषयितावच्छिन्ननिरूपितज
नकतावच्छेदकविषयितात्वम् तस्योक्तत्वात्। उक्तबाधविषयितायाः व्यापकाभावस्येति न्यायेन तादृशप्रकारताविरहप्रयोजकत्वान्नाव्याप्तिः तत्रैव स
त्त्वतिपक्षे नातिव्याप्तिः। ह्रदे वह्निप्रकारताभावत्वस्य तद्विषयिताप्रयोज्यतावच्छेदकत्वादिति दिक्। संशयपक्षाधारणेति प्रयोजनं स्फुटं। एवं भ्रमत्वा
निश्चयदशायामपि। अप्रामाण्यग्रहाभावविशिष्टेति। ननु तदंशे ग्राह्याभाववद्भ्रमत्वं न ग्राह्यवति तन्न ग्राह्याभावप्रकारकत्वं तद्ग्रहस्यानुत्तेजकत्वप्रसं
गात्। तस्य तद्धर्मावच्छिन्ने ग्राह्याभावग्राहितया तद्धर्मावच्छिन्ने ग्राह्याभावोत्तरमनुत्पत्तेः। नापि तद्धर्मवद्विशेष्यकत्वावच्छिन्नं ग्राह्यवति ग्राह्याभावप्रकारक
त्वं। पर्वतो निर्वह्निरिति ज्ञानस्य पर्वतविशेष्यकत्वावच्छिन्नवन्ह्यभावभ्रमत्वज्ञानविषयस्यापि पर्वतत्वावच्छेदेन वह्निमत्ताज्ञानविरोधित्वानुपपत्तेः।
न चेष्टापत्तिः। एकपर्वतांशे वन्ह्यभावभ्रमत्वस्यान्यपर्वतांशे वन्ह्यभावप्रमात्वाविरोधित्वेन तादृशभ्रमत्वग्रहदशायामपि तादृशप्रमात्वग्रहोत्पत्तेः प्रमात्व
नगृह्यमाणग्राह्याभावग्रहदशायां चानुमितेरनुत्पत्तेः। न च यावत्तद्धर्मवद्विशेष्यकत्वावच्छिन्नभ्रमत्वग्रहस्यैवावच्छेदकावच्छेदेन साध्यग्रहप्रतिबंधक
तायामुत्तेजकत्वान्न दोष इति वाच्यं। तथा सति धर्मितावच्छेदकाश्रयकनियममात्रविशेष्यके तद्धर्मिणि ग्राह्याभावभ्रमेः स्वावच्छेदकावच्छेदेन विशिष्टबुद्धिविरो
धिताप्रयोजकभ्रमत्वस्य दुर्घटत्वापत्तेः तज्ज्ञानाविषयधर्मिणां तज्ज्ञाननिष्ठभ्रमतावच्छेदकत्वासंभवात्। तदभाववद्विशेष्यकत्वावच्छिन्नतयावद्धर्मि

ग॰टी॰
१५
15

विशेष्यकतावच्छिन्नभ्रमत्वस्य दुर्घटकत्वाच्चेति मैवं सामानाधिकरण्येन विशिष्टबुद्धिविरोधिज्ञाने अवच्छेदकावच्छेदेन ग्राह्याभावज्ञाने तद्धर्मवद्विशे
ष्यकतावच्छिन्नस्य ग्राह्यवत्तिग्राह्याभावप्रकारकत्वरूपभ्रमत्वस्य ज्ञानमुत्तेजकं। ग्राह्यवद्वृत्तिग्राह्याभावप्रकारतानिरूपिततद्धर्मावच्छिन्नविशेष्यताक
त्वरूपभ्रमत्वस्य वा। अवच्छेदकावच्छेदेन विशिष्टबुद्धिज्ञाने च ग्राह्याभावप्रकारतानिरूपिततद्धर्मावच्छिन्नविशेष्यतात्वावच्छेदेन ग्राह्यवद्वृत्तित्वावगाहि
द्वितीयभ्रमत्वस्यैव। ईदृशतज्ज्ञाने च सत्तिग्राह्याभावप्रकारतानिरूपिततद्धर्मावच्छिन्नविशेष्यतात्वविशिष्टे ग्राह्याभाववद्वृत्तित्वभानासंभवान्न तदवगा
हिप्रमात्वज्ञानसंभव इति नादृशभ्रमत्वग्रहदशायां न विशिष्टज्ञानुपपत्तिः। न च ग्राह्यवद्वृत्तित्वग्राह्याभाववद्वृत्तित्वयोरविरोधात्कुतः तत्र ग्राह्यवद्वृत्तित्व
ग्रहदशायां ग्राह्याभाववद्वृत्तित्वाग्रह इति वाच्यं। विशेष्याभेदेन विशेष्यताभेदाद्विशेष्यतात्वविशिष्टग्राह्यवद्वृत्तित्वस्य ग्राह्याभाववद्वृत्तित्वविरुद्धत्वयो
रुभ्रमत्वघटकया ग्राह्यवद्वृत्तित्वे विशेष्यतात्ववैशिष्ट्यं निवेश्यताऽऽदृशभ्रमत्वग्रहस्य ग्राह्याभाववद्वृत्तित्वावगाहिप्रमात्वग्रहप्रतिबंधकत्वस्योपपादनीय
त्वात्। यदि च तयोर्विरोधग्रहो न सार्वत्रिक इति मन्यते तदा भ्रमत्वघटकग्राह्यवद्वृत्तित्वस्थाने ग्राह्याभाववद्वृत्तित्वमेव निवेश्यं तद्वद्वृत्तित्वतद्वद्वृत्तित्व
योर्विरोधस्य निर्वादत्वात् निर्धर्मितावच्छेदककगगनादिमात्रमेव विशेष्यवच्छिन्नभ्रमत्वस्य ज्ञानमुत्तेजकं। इदं तु बोध्यं आहार्यग्राह्याभावज्ञानस्य त्वे
ग्राह्यताको तस्यानाहार्यत्वं निवेश्यं। न तु तद्धटेच्छाजन्यभिन्नत्वं। तद्धर्मविशिष्टग्रहकालीनतद्धर्मज्ञानं प्रत्येवेच्छाया हेतुत्वात् वन्ह्यादिनिश्चयपरक्षणकाली ग॰म॰
नेच्छाकालीनवन्ह्यभावादिनिश्चयस्य वन्ह्यादिग्रहविरोधित्वनिर्वाहः तदाहार्यवन्ह्यादिनिश्चयकालीनवन्ह्यभावादिग्रहस्य निरूक्तानाहार्यत्वोपपत्तये च १५

नाहार्यवन्ह्यादिनिश्चयानंतरवन्ह्यभावादिज्ञानत्वस्यैवेच्छाजन्यतावच्छेदकतयाऽन्योन्याश्रयापातात्तुल्ययुक्त्या आहार्यवन्ह्यादिज्ञाननिष्ठतदिच्छाजन्यता
वच्छेदकगर्भेश्च नाहार्यवन्ह्यभावादिज्ञानस्यनिवेश्यतया तादृशानाहार्यत्वस्य वन्ह्यभावादिजिज्ञासाघटितत्वेन वन्ह्या आहार्यवन्ह्यादिज्ञाननिष्ठतदिच्छा
जन्यतावच्छेदकगर्भेश्च नाहार्यवन्ह्यभावादिज्ञानस्यनिवेश्यतया दृशानाहार्यत्वस्य वन्ह्यभावादिजिज्ञासाघटितत्वेन वन्ह्यादिजिज्ञासाजन्यतावच्छेदकस्य
वन्ह्यभावादिजिज्ञासाघटितत्वात् वन्ह्यभावादिजिज्ञासाजन्यतावच्छेदकस्य च वन्ह्यादिजिज्ञासाजन्यत्वघटितवन्ह्यादिज्ञाननिष्ठानाहार्यत्वेन घटितत्वा
दिति चेन्न तद्धर्मविरोध्यवच्छिन्नधर्मिकतद्धर्मज्ञानत्वेनैव जिज्ञासाजन्यत्वोपगमाद्वन्ह्यादिनिश्चयशून्यकालीनवन्ह्यादिज्ञाने सेच्छाजन्यभिन्नत्वसंभवात्
। विरोधिग्रहकालीनस्यापि विरोध्यविषयकज्ञानस्याहार्यतानुपगमेनान्योन्याश्रयपरीहारात् । अन्ये त्वाहार्यतानविरोधानभासतेन मध्यस्य सर्वेन्नाहार्यज्ञाने सं
शयात्मकमेवोपेये विरोधिकोट्युपस्थितिः तत्सूर्वनियमतः सत्वेन तत्तत्कोटिभाने बाधकाभावादिति निश्चयत्वनिवेशमात्रोदेवोपपत्ताव नाहार्यत्वनिवेशा
वैयर्थ्यमिति चेन्नाभिन्नविषयकानुमित्सादिसामग्रीरूपप्रतिबंधकवशेनाजिज्ञासितविपरीतकोटिभाननिवृत्तेः पिच्छाविक्त चिदाहार्यज्ञाने संभवात् । वि
परीतज्ञानसामग्र्यपेक्षया आहार्यसामग्र्या बलवत्त्वदर्शनेनाडवेलविजातीयज्ञानसामग्र्याइच्छासहिताया बलवत्त्वमनिहितवतः पक्षधरस्यतज्ज्ञाने विरो
धिजिज्ञासायाः प्रतिबंधकत्वानुमत्वाहार्यज्ञाने विरोधिकोटिभानाप्रसक्तेश्चा अत एव विषयपरिशोधकतर्केस्यानुमितिविरोधितापाभावजिज्ञासा निवर्त्त
नद्वारानुमानोपयोगित्वमुपपद्यते । नचैवमनाहा — र्यत्वनिवेशे उक्तदोषतादवस्थ्यमिति वाच्यं । आहार्यत्वाभावज्ञानानुत्पत्तिवसायेन पूर्वोपस्थितत्वाद्य व

ग॰ टी॰
१६
16

द्विशेष्यकत्वभानेन भ्रमत्वज्ञानरूपोत्तेजकनि॰ र्वाहात्तन्न एवोपपत्तेरनाहार्यत्वनिवेशानुपगमादित्याकूतः। शंखादावित्यादिकं मूलदूषणमवतारयति
नन्विति। प्रमात्वज्ञानं विनेति पाठेऽभिमानः। आपादकत्वज्ञानमिति पाठान्तरं। तत्र भ्रमत्वग्रहस्यैवेति दोषविशेषजन्यशंखादिगोचरश्वैत्यसाध्याभावबुद्धौ श्वै
त्यादिव्याप्यशंखत्वादिमद्विशेष्यकत्वेन लिंगेनेति शेषः। यावद्भ्रमत्वं न गृह्यते तावदनुमितिप्रतिबंध इष्ट एवेति भावः। अभिधानेन व्याप्तिपक्षधर्मतयोर्हेतु
ज्ञानमित्यादिमूलेन। उपपत्तेः बाधनिश्चयदशायां शाब्दबोधानुत्पादोपपत्तेः। ननु तत्र प्रतियोगिमत्ताज्ञानस्य प्रतिबंधकत्वमुपेयत एव परं त्वभाववत्ता
ज्ञानस्य विरोधितास्थल एव संसृष्टत्वज्ञानस्य कारणत्वं स्वीक्रियतामतो नाप्रसिद्धसाध्यकानुमित्युच्छेदः तदभावनिश्चयदशायां सिद्धेरेव प्रतिबंधकत्वा
त्तत्संसृष्टत्वज्ञानकारणताया एव निर्युक्तिकत्वादत आह एवमन्नेति। तर्हि तादृशशाब्दप्रत्येव संसृष्टत्वज्ञानं कारणमस्त्वित्यत आह अनुमितौ चेति
। घटत्वाद्यवच्छिन्ने पृथिवीतरभेदसाधने तादृशबाधज्ञानप्रसिद्धेः पृथिव्यामिति। हेतुत्वासंभवेऽपि हेतुत्वस्य मयानंगीकारेऽपि अव्याहतत्वेवेति। तथा च वि
लीयतां चेत्तनेनाप्रसिद्धसाध्यकानुमितिसामान्यानुपगमोऽनुचित इति भावः। उपगमादिति अन्यथा साध्यविशेष्यकानुमित्यनिर्वाहप्रसंगादिति भावः। प
क्षताविरहेणेति। साध्याभावग्राहिसंशयविरहेणेत्यर्थः। प्रकृते संशयरूपपक्षतानपेक्षणादाह साध्यविशेष्यकेति। निर्युक्तिकत्वादिति सिद्धिदशायामनुमित्या
पत्तिवारणायैव संशयस्य हेतुत्वोपगमात् एवं चेतरत्पृथिवीसंबद्धं नवेति संशयस्यापि पक्षतात्वं दूषितं बोध्यं। पृथिव्यामिति। पृथिवीविशेष्यकजलभेद गम॰
प्रकारकानुमितेरित्यर्थः। संभवेऽपीत्यनेनान्वयः। तादृशेति साध्यविशेष्यकेत्यर्थः। विशेषेति कोऽयं तरोपस्थितावपि तदभावापत्तादृशपरामर्शाद्वितीयक्षणे १६

प्रतियोगिमत्ताज्ञानरूपबाधज्ञानसंभवात्परामर्शस्य कथं वितुच्छं खलु साध्यविशेषताशालित्वेनुमानानुपपत्तिगंधोपीति सूचितं। साध्यविशेषणताक
ज्ञानमपि शुलभमित्याह विशिष्टेति। अनुमित्यनभ्युपगमेपीति तस्यानेसाध्यविशेष्यकप्रसक्तस्योपगमसंभवात्ताननोरवमिति। व्यभिचारभयेन
तादृशपरामर्शविशिष्टं प्रति तादृशपरामर्शत्वेन हेतुताया वक्तव्यत्वादिति भावः। संसृष्टत्वज्ञानासंभवेन साध्यविशेष्यकानुमित्यनुपगमं दूष
यतां मतं दूषयति अत एवेति। सामग्र्यं तदाकल्पनादेवेत्यर्थः। भेदादीति। इदं च विशिष्टविशेषणासंसृष्टत्वज्ञानं प्रकारतावच्छेदकांशे संशयत्वमुपगम्य
नतु भेद इतरीयो न चाप्रसिद्धिभिन्नानवेसाकारकं तथा सति बाधग्रहस्य साक्षात्प्रतिबंधकतालीकापत्तेः एतत्सूचनायैव संशयपदद्वयमिति बोध्यं।
तत्र विशेष्ये विशेषणमिति रीत्यैवानुमितिं ध्वनयति विशेषणत्वेति। इतरबाधस्य ज्ञानं नवह्निधर्मिकमहानसीयत्वसंशयात्मकपक्षधर्मिकवह्निसं
सृष्टत्वज्ञानसंभवः महानसीयेतरवह्निज्ञाने तदभावनिश्चयस्य विरोधित्वात्। अनुपपत्तिरिति विलीयतां चेद्विरोधे तादृशानुमितिविलयपर इति भावः
।वह्नाविति। वह्निर्महानसीयो न वा पर्वतश्च वान् संसृष्टो न वेति समूहालंबनेत्यर्थः। विशिष्टस्यैव विशिष्ट्यमिति साक्षाद्बोधसामग्र्यप्रसक्तं स्फुटयति अयंत
रेति। महानसीयत्वविशेष्यतापन्नवह्निकोटिकेति पाठः। महानसीयत्वाविशिष्टवह्नित्वावच्छिन्ने सपपाठः। मादृशसंशयादेवेति एवं तिरबाधनिश्चयस्य
संशयोत्तरकाल इति भावः। तुल्य इति। यदि तत्र महानसीयत्वतदभाववद्वह्निमान्वह्निसामान्याभाववान्वेत्येवं संशयो न तु महानसीयवन्न्यभावकोटिक
इत्युच्यते तदा प्रकृतेपि तुल्यमित्यर्थः। मन्मते इति। न च प्रमात्वनिश्चयपत्वं प्रमात्वाभावाप्रकारकत्वगर्भं तथा च गर्वि ति वाच्यं तत्साध्याभावे संशये क्वचिद्व्याप्यताव

ग०टी० च्छेदकरूपेण कश्चिद्व्याप्याभावाभाववत्त्वेन ग्राह्यत्वस्यैककोटितयाद्विविधसंशयवारणाय तत्तद्रूपावच्छिन्नप्रकारकान्यत्वद्वयनिवेश्यतया ग्राह्याभाववन्नि
४ श्चयस्य संग्रहाय वास्तवग्राह्याप्रकारकत्वनिवेशासंभवात्। न च प्रमात्वघटक·विशेष्यतादौ ग्राह्याभाववद्वृत्तित्वांशे निश्चयत्वनिवेशोऽधिक इति वा
च्यं। विशेषणताश्रमिके संशयानुपगमे न तदंशे निश्चयत्वानिवेशात्। अभावांशे इति तथा च मन्नते बाधज्ञाने न निश्चयत्वप्रवेशावश्यकतेति भावः। एवं
17 च विशिष्टबाधज्ञानस्य प्रतिबंधकत्वे चाप्रतिबंधकत्वादिति। यादृशज्ञानस्य हि तादृशविशिष्टविषयकज्ञानस्य प्रतिबंधकत्वं तदुभयानधिकर
णक्षणावृत्तित्वविशिष्टतादृशविशिष्टविषयतार्थयाप्यनधिकरणत्वे सति प्रद्रूपावच्छिन्नविषयितासामान्यप्रकृतानुमितिबंधकतावच्छेदकं तद्रूपाव
च्छिन्नत्वरूपलक्षणसत्त्वादाभासतावोध्याश्रयाप्यत्वज्ञानास्कंदितज्ञानसाधारण्येनेति एतन्मिते निश्चितप्रमात्वकत्वाभावान्न तत्र प्रतिबंधकता॥ अप्रामाण्य
ज्ञानानास्कंदितत्वोपादानेपि भ्रमत्वप्रमात्वाभ्यामनिश्चिते प्रतिबंधकत्वं नास्तीति अप्रसक्तिरिष्टैवा। प्रमितेतितथा च स्वविशेष्यकसाध्यवदविशेष्यकज्ञान
प्रकारतानिविशिष्टसाध्याभावविशिष्टपक्षविषयितायास्तत्त्वालाक्षणसमन्वय इति भावः। भावसाध्यकस्थले इति विपरीतमेव चेत्सनेनाभावस्थले निश्चय
त्वस्य लाघवमुक्तं स्फुटतरं चेत्सनेन तु भावसाध्यके निश्चयत्वप्रमात्वयोस्तु इत्युक्तमिति विशेषणद्वयसादनाय। विशेषणोपीत्यपिना भ्रमत्वीयविशेषणसमुच्चयः एम०
।निश्चयसंग्रहाय गोत्वाभाववेत्यादिः। अभावरूपसाध्याभावज्ञाने प्रामाण्याभावस्य ग्रहतया न विनिगमनाविरह इत्यतो भावरूपेति साध्याभावविशेषणांत
याचतत्रद्वयोरपि प्रतिबंधकतावच्छेदकत्वमवर्जनीयमिति भावः। तुल्ययुक्त्याप्रमात्वग्रहे भ्रमत्वज्ञाने तेनाप्रतिबंधात्तत्रापि प्रमात्वग्रहोऽपेक्षणीय इति १७

पुन्नाकार्यग्रहः। स एव कार्यप्रतिबंधादिरेव। तत्र तादृशाप्रामाण्यग्रहो प्रतिबंधाप्रतिबंधप्रयोजकविशेषणतापर्यंप्रदानवस्थां अप्रामाण्यज्ञानोत्त
जो ताकतामते विशकते। अगृहीतेति। तदप्रामाण्य निश्चयेपि बाधनिश्चयधर्मिकाप्रामाण्यग्रहधर्मिकाप्रामाण्यनिश्चये सत्यर्थः। तादृशाप्रामाण्य
प्रतिबंधकतावच्छेदककोटौ उक्तस्थले प्रतिबंधानुपपत्तिरतः अगृहीतेति। ननु पक्षतादृशाप्रामाण्यनिश्चयेः रामाण्यग्रहस्तत्र कार्यप्रतिबंधापत्ति
तत्तत्राप्रामाण्यग्रहं निवेशयति तादृशेत्यादिना। ननु पक्षबाधनिश्चयधर्मिकाप्रामाण्यनिश्चयधर्मिकाप्रामाण्यग्रहे अप्रामाण्यनिश्चयः तत्र कार्याप
त्तिः अनिश्चिताप्रामाण्यकत्वेन विशेषणे तु जत्र विशेषणापर्यंप्रदानवस्थेत्यत अनिश्चिताप्रामाण्यकत्वाविशेषितेति। नन्वेवमनवस्था वारणेपि कार्या
पत्तिर्दुर्वारैत्यत आह तद्देशिष्टेति। द्वितीयाप्रामाण्यग्रहधर्मिकप्रामाण्यनिश्चयविशिष्टबाधनिश्चयत्वेनेत्यर्थः। अपष्टाणु रितिग्राह्याभावसंशये स
ति विनाविशेषदर्शनं प्रत्यक्षनिश्चयानुत्पत्त्या संशयसाधारणग्राह्याभावज्ञानत्वेनैव प्रतिबंधकता। संशयानंतरं सति विशेषदर्शने प्रत्यक्षनिर्णयनि
र्वाहाय तत्र विशेषादर्शनविशिष्टत्वं देयं। संशयोत्तरं संशयोत्पत्त्या च संशयेग्राह्याभावनिश्चयस्य प्रतिबंधकत्वांतरमेव तन्मते बोध्यं। न हेत्वाभासतेति अ
नुमित्यनुत्पादप्रयोजकज्ञानविषयस्यैव हेत्वाभासत्वादिति भावः। तन्नाशेति नापं एवाणु रितिलौकिकस्यालौकिकत्वघटितविपरीतनिर्णयप्रामा
ण्यप्रतिबध्यतावच्छेदकानाक्रांतत्वादुत्पत्तेरलौकिकप्रत्यक्षं तद्बोध्यं। दूरत्वादिदोषसामाग्र्यजन्यत्वमप्यविशेषदर्शनोत्पत्तिकाले तदुत्तरं चासंभवेन दो
षविशेषाधीनपीतत्वादिभ्रमस्थलवत्तात्र विशेषदर्शनाधीनभ्रमस्वीकल्पना। तत्कल्पनेपि सहसाविलंबस्यावश्यकतया तत्स्थले पूर्वभ्रमनाशस्यावश्य

ग०टी०
१८
18

कतया नत एवोपपत्तेरित्याशयेन भ्रमत्वग्रहमनभिधाय तन्नाश एवोक्तः। अत एवाग्रे उपपद्यते चेत्यादिना दोषविशेषजन्यभ्रमस्थले एव भ्रमत्वग्रहो
दर्शयिष्यते परोक्षेति। तथा च परोक्षस्थलसाधारणरूपेण विशेषादर्शनविशिष्टग्राह्याभावज्ञानप्रतिबध्यतावच्छेदकं किन्तु प्रत्यक्षनिर्णयत्वमेवाविशेष
दर्शनसत्त्वे बाधनिश्चयसत्त्वे विशेषदर्शनेन बाधेः प्रामाण्यग्रहे सत्येवानुमितिः। निश्चितप्रामाण्यकबाधग्रहे तु अनुमित्यापत्तिरेवेति भावः। एवं वि
शेषादर्शनवैशिष्ट्यमनिवेश्य निश्चयत्वावच्छिन्नप्रतिबन्धकतायाः प्रतिबध्यतावच्छेदकमप्यनुमित्यादिसाधारणं तदन्यावाप्रकारकप्रत्यक्षान्यत
त्वकारकज्ञानत्वमेव न तु पक्षीयत्वं तथा सति विशेषदर्शनसत्त्वे बाधनिश्चयसत्त्वेऽनुमित्यापत्तेः। एवं च यत्र दूरत्वादिप्रयुक्तोऽयं स्थाणुरिति भ्रमः त
तत्र करादिमत्ताग्रहे सति नायं स्थाणुरिति निश्चयसंपादनाय समानेन्द्रियजन्यविपरीतनिर्णय एव दीधितिकृद्भिर्विशेषादर्शनवैशिष्ट्यनिवेशो दर्श
यिष्यते। न चैतावता संशयशाब्दबोधादिसाधारणानिरुक्तरूपावच्छिन्नप्रतिप्रतिबन्धकतायां तन्निवेशभ्रमः कार्यः। न च शाब्दबोधादिसंग्राहकोक्तरूप
स्य प्रतिबध्यतावच्छेदकत्वांगीकारे वैयर्थ्यं। बाधनिश्चये विशेष्ये विशेषणतया घटितत्वरूपयोग्यताज्ञानविलंबादेव शाब्दबोधानुत्पादनिर्वाहात्। नि
श्चितप्रामाण्यकबाधस्थले परामर्शः प्रामाण्यग्रहे सोवानुमित्यनुत्पादनिर्वाहादनिश्चितप्रामाण्यकबाधग्रहेऽनुमितेरिष्टत्वादिति वाच्यं। निश्चितप्रा
माण्यकबाधसत्त्वे तस्यानुमितिप्रतिबन्धकत्वमते अनुमितिसामग्रीप्रतिबन्धेन परामर्शप्रत्यक्षात्मकाप्रामाण्यग्रहस्यासंभवादनुमित्यात्मकतद्ग्रह रा०म०
स्य चानुमायकलिंगधर्मिकव्याप्त्यादिज्ञानविलंबेनाविलंबाद्वानुमित्युत्पादस्य दुर्वारत्वात् तस्यानुभवविरुद्धतयेष्टापत्त्ययोगात्। अत्र प्रतिबध्यतावच्छे १८

दर्केः लौकिकत्वाभिवेशात्तस्याप्रमुत्वगोचरचाक्षुषभ्रमानंतरं करादिदर्शने लौकिकमपि तस्याप्रमुत्वाभावचाक्षुषधर्मं मनाशानेतरमेव सर्वाकापीवत्तु
तःस्याप्रमुत्वभ्रमस्तत्र न लौकिकः किंतूपनीतमानरूपः तस्य विशेषदर्शननिवर्त्यत्वात् । समानेंद्रियजन्यलौकिकप्रत्यक्षे चक्षुषे च लौकिकसाक्षात्कारा
त्मकविपरीतनिश्चय एव विरोधी उपनीतमानस्यानुमित्यादिसमशीलत्वात्तत्सादृशभ्रमस्याविरोधित्वात् तस्याप्रमुत्वत्वाव चाक्षुत्वेन विलंबात्तत्त्वेपि वि
शेषदर्शनस्यापि तस्य प्रतिबंधकत्वमिति । ननूपनीतमानरूपसमानेंद्रियजन्यविपरीतज्ञानस्य लौकिकप्रत्यक्षाविरोधित्वेपि मंडूकवशांजना
दिदोषजन्यस्य शंखः पीतः वंशउरग इत्यादि स्पर्शमात्रारोपस्य सत्त्वे पीतत्वोरगत्वाभावादि चाक्षुषप्रसंगः मैवं । दोषस्य तद्विरोधित्वात् । अथैवं समा
नेंद्रियजन्यविपरीतज्ञानविरोधितामात्र एव विलयापत्तिः । नच शंखो न पीत इति लौकिकचाक्षुषसत्त्वे दोषविशेषाधीनशंखः पीत इतिमत्यस्य वारणाय
समानेंद्रियजन्यविपरीतज्ञानप्रतिबंधकत्वमावश्यकं । दोषविशेषाजन्यज्ञानत्वस्य विपरीतज्ञानसामान्यप्रतिबध्यतावच्छेदकतया तेन तद्वारणात्
अतएव साक्षात्कारभ्रमे साक्षात्कारि विशेषदर्शनमेव विरोधीति ग्रंथ इति वाच्यं । दोषविशेषसत्त्वे तेन प्रतिबंधाच्च शंखो न पीत इति चाक्षुषस्येवानुत्पा
दात्तस्य विरोधित्वासंभवादिति चेन्न । यत्र शंखो न पीत इति चाक्षुषोत्तरं दोषसमवधानं तत्र सत्त्वो शंखः पीत इति चाक्षुषवारणाय समानेंद्रियजन्यविपरी
तज्ञानस्य प्रतिबंधकत्वमावश्यकमित्यभिप्रायेणैव साक्षात्कारभ्रमे इति ग्रंथसंगतेः ॥ एवं स्पर्शमात्रारोपस्यापि दोषविशेषजन्यत्वेनो लौकिकप्रत्यक्षस्य तुल्यत्वात् पा
दोषनाशेपि तादृशविपरीतज्ञानसत्त्वे समानेंद्रियजन्यप्रत्यक्षानुत्पादात्तस्यावश्यकप्रतिबंधकतायां दोषविशेषजन्यत्वं निवेश्यं तेन पित्ताद्यजन्यस्य

ग॰टी॰ १९ 19

मान्यजन्यशंखादिगोचरपीतत्वभ्रमस्य तद्गोचरपीतत्वाद्यभावलौकिकप्रत्यक्षविरोधित्वापत्तिः। अत्र तत्तद्दोषविशेषजन्यत्वनिवेशे समानेन्द्रि
यजन्यलौकिकसन्निकर्षजन्यप्रमायाश्च संग्रहादुपरीतभानभिन्नत्वमपि निवेश्यमिति समांप्रकारविशेष्य विशेषस्यावश्यं निवेश्यतया तद्भेदेन प्रति
बंधकताभेदादेकविशेष्ये एकप्रकारस्य प्रमाभ्रमोभयासंभवाद्भिन्नप्रतिबंधकतायामेव तन्निवेशो चित्यात्। परे तु दोषविशेषजन्ये शंखः पीत इति
ज्ञानेपीतिमानं प्रत्यक्षमीत्यनुव्यवसायोपदर्शनाल्लौकिकत्वरूपविषयताविशेषः स्वीकार्यः। तद्वत्त्वेनैवोक्तभ्रमस्य विरोधिता न तु दोषविशेषजन्यत्वेन गौरवा
त्। एवं बाधनिश्चयसामान्यप्रतिबध्यतावच्छेदकोपि न दोषविशेषाजन्यत्वलौकिकसन्निकर्षजन्यत्वयोर्निवेशः किंतु लौकिकान्यतरत्वकारतायाएवय
तः लौकिकालौकिकज्ञानयोर्विषयतावैलक्षण्यादुपनीतभानस्य कथं लौकिकसन्निकर्षजन्यत्वं स्यात् तत्प्रकारकजन्यतावच्छेदकस्य दुर्वचत्वात्। न च तद्वि
षयकज्ञानाजन्यतत्प्रत्यक्षत्वं भविष्यति। लौकिकसन्निकर्षजन्यबुद्धेरपि विशेषणाजन्यत्वादिति विषयतावैलक्षण्यमावश्यकमित्याहुः। परे त्वसमिधानवी
जं स्वपं दर्शयति उक्तस्थलेपीति दूरस्थे धर्मिणी सा पुक्तस्थलेपी स्पर्धी। प्रत्यक्षं लौकिकं। दोषप्रतिबंधकतायामेव तदुत्तेजकं न तु विपरीतज्ञानप्रतिबंधक
तायामित्यर्थः। यानन्निदाविति तादृशपीतत्वज्ञानस्य मानसत्वाभिधानं तादृशज्ञानेोसत्तावश्यमालौकिकत्वशंकानिरासाय। तत्रैव दोषविशेषघटितचक्षुर्ध
र्मिसंयोगादिरूपसामग्रीलक्षणप्रतिबंधकनिवृत्तिलाभात्। यत्र विपरीतनिश्चये पक्षे इति पद्रूपावच्छिन्नेत्यायाश्चावग्रहस्तद्रूपावच्छिन्ने हेतुप्रकारज्ञानस्यैव ग॰म॰
तादृशज्ञानत्वादिति भावः। अनुमितिविरोधितया व्यभिचारज्ञानविषयानुमित्यनुपधानाप्रयोजकतया। विशिष्टस्येति साध्यावच्छिन्नतात्तृतीयलिंगपरामर्शस्यभि १९

धामं द्वितीयलिंगपरामर्शे दोषविशेषादिना व्यभिचारभाने तृतीयतदभावादेवानुमित्यनुत्पाद इति सूचनाय प्राच्यमते तृतीयस्यावश्यकत्वेनानुज्ञान
द्वयकारणतामते इति वा। बाधग्रहस्थले किं कुः। बाधादेवैवैषेव कारणं व्यभिचारज्ञानस्य व्याप्तिविघटनेनैवानुमितिविरोधितेति परामर्शान्तरं बाधग्रहे स
त्यनुमित्यनुत्पादस्य तन्मात्रप्रयोज्यत्वालाभः। अत्र साध्याभावप्रमापाद्याबाधत्वमते प्रमात्वानपेक्षकृतपक्षे साध्याभावानवगाहित्वे विरोध्यविषयकत्वेन प्रतिबं
धकत्वानुपपत्त्या वह्न्यभाववति ह्रदे वह्न्यभावप्रकारकत्वादिरूपप्रमात्वविवक्षणे तज्ज्ञानदशायां हेतुमभानानस्य व्यभिचारज्ञानस्यावश्यकतया बाधस्य हे
त्वाभासत्वानुपपत्तेः। न च प्रमात्वज्ञानेन ह्रदत्वावच्छिन्ने वह्निवह्न्यभावावगाहनेऽपि वह्निविशिष्टवह्न्यभाववद्वृत्तिविषयतानवगाहनेनैव विरोध इति वाच्यं। व
ह्न्यादिविरोधशालिवह्न्यभाववद्वृत्तिविषयत्वस्य ह्रदत्वादिसमशीलस्याविरुद्धत्वेनाज्ञातप्रमाणस्याविरोधितयावगतो विरोधित्वाभावेन बाधत्वासंभवात्।
क्वाचित्कमिति एतच्च मूले उपजीव्यत्वेनोपजीव्यत्वं बाधिकावलरूपत्वेनैतेनाभिहितमिति बोध्यं। अत्र नव्याः प्राग्भूतत्वादनवस्थानादिति न वि
वृत्तं यत्नेति। न च भ्रमत्वरूपकोद्युपस्थितत्वेऽपि प्रमात्वस्यानंतरभावव्याप्तिसंभवः समूहालंबनेन तदुभयसमावेशादिति वाच्यं। भ्रमत्वप्रमात्वयोरेकविषये:
सत्तात एकावच्छेदकगर्भविरुद्धत्वसंभवात् प्रमात्वव्यापकताघटकसामानाधिकरण्यस्यैकावच्छेदकगर्भत्वाच्च। आदिना विशेषदर्शनांतराभावपरि
ग्रहः। एवं चान्यत्र यामात्रापग्रहवैयर्थ्यं इष्टापत्तिसूचनाय प्रकृते विसंवादः ईदृशोपयोगितापामितिभ्रमात्वघटितभ्रमत्वाद्युपस्थितिर्यत्र तादृशभ्रमत्वादिशंको
च्छेदार्थं प्रमात्वज्ञानादेर्यमात्वनिश्चयस्योपयोगो नान्यत्रेति क्रमेणोक्तिमाव। व्यभिचारज्ञानस्येति अधिकबलत्वदूषणं। संशयतीतिसाध्याभावांशे संश

पक्षस्यापीत्यर्थः। ग्राह्यसंदेहप्रतिबंधकतामते इदं। नच तदप्रतिबंधकतामते व्यभिचारसंशयस्य व्याप्तिज्ञानाविरोधित्वेप्यनुमितिविरोधित्वमप्येय
मितिवाच्यं। व्यभिचारसंशयस्य व्याप्तिसंशयसामग्रीत्वेन तत्सत्वे तन्निश्चयानुत्पादादेवानुमित्यनुत्पादनिर्वाहात् तस्य साक्षादनुमितिविरोधित्वाकल्पनात्
। नच हेतुमानयं देशः साध्यवान्नवेति संशयदशायां विशेषादर्शने साध्याभाववांशे निर्धर्मितावच्छेदककः हेतुः साध्याभाववद्वृत्तिरिति निश्चयो दुर्वा
र इति वाच्यं। तदापि हेतुः साध्याभाववद्वृत्तिर्नवेति संशयस्यैवोत्पादात्। अन्यथा रक्तो दंडो नवेति संशये विशेषादर्शने च रक्ताभाववानिति रक्तत्वांशे निध
र्मितावच्छेदककनिश्चय एवस्यात् नतु रक्तदंडवान्नवेति संशयः परंतु तदप्रतिबंधकतामते साध्याभावाधिकरणांशे साध्याप्रकारकत्वमात्रं निवेश्यं। वस्तु
तस्तदपि न प्रकारतावच्छेदकांशे संशयत्वनिराकरणात्। तथाच पक्षे साध्यप्रकारकत्वस्यैव नापेक्षा तत्र निश्चितप्रामाण्यकत्वापेक्षा सुदूरपराहतेति भा
वः। उक्तत्वेति। एतत्स्वयमग्रे विवरणीयं। असंसर्गाग्रहो बाधनिश्चयाभावः। वैशिष्ट्याप्रसिद्धाविति। अभावप्रत्ययः। प्रतियोग्यंशे प्रकारीभूतधर्मस्यैव प्रति
योगितावच्छेदकत्वमवगाहते इति नियमात् कांचनमयपर्वते न वह्निर्नास्तीति प्रत्यययोः सिद्ध एवेत्यर्थः। विशिष्टस्य वैशिष्टस्य वैशिष्ट्य। मितिमापेनानुमितिसं
भवं पूरयति पूर्वमिति। कथंचिदिति। वह्निर्न कांचनमय इत्यज्ञाने इत्यर्थः। कारणांतरं शुद्धसाध्यव्याप्तिग्रहसहकारि विशिष्टसाध्यकानां तस्य च प्रकृतहेतौ
स्त्व। तादृशबाधदशायां कांचनमयत्वोपनयपक्षत्वेपि शुद्धसाध्यानुमितौ विघ्नापत्तिं सूचयति। तादृशबाधेति। साक्षाद्व्यभिचारज्ञानविरोधितामतेपिस्वदोषतां
व्यसादयति। पक्षातिरिक्तेति। विलक्षणविषयताविरहेणेति। यदिच कांचनमयपर्वतसहितवह्नितावच्छिन्ननिरूपितव्याप्तिविषयकतद्धेतुकपरामर्श

जन्यानुमितित्वं प्रतिबध्यतावच्छेदकं तदा विलक्षणविषयतासत्वेपि न क्षतिरिति बोध्यं। मिनिताभासमानयोः प्रतियोगिविशेषणतातात्पर्यान्निहीनयोः
एकस्यामिति महानसीयवह्निर्नास्तीत्यादौ अभावविषयतानिरूपिततत्प्रतियोगितासंबंधावच्छिन्नप्रकारताच्छेदकतायाद्वाभावविषयतानिरूपितानुयो
गित्वसंसर्गतानिरूपितावच्छिन्नप्रतियोगितानिरूपितत्वसंबंधावच्छिन्नावच्छेदकतायाश्चाभावप्रतियोगितावच्छेदकतापर्याप्तिव्याप्यत्वात्। अभावविषयि
तानिरूपितप्रतियोगित्वसंसर्गतानिरूपितावच्छेद्यतासंबंधावच्छिन्नविषयताया एव वा तद्व्याप्यत्वं बोध्यं। कर्मकेति। विजयेत वादीति मूले वादीत्यस्य प्रतिवा
दीत्यर्थः। विजीयेतेति वा आख्यातार्थः। एतदिति अनुमितिसप्रामाण्यशंकाया इत्यादिः। मूले इति उद्देश्यानुमितेः प्रतिबंधान्न तत्र बाधो दोष इति मूले शंकयेत्य
र्थः। विशिष्टानुभवे विशेषणज्ञानहेतुतायाश्चाप्रामाणिकोवेति व्यञ्जनायपहीति। मनसः सन्निकर्षः। ज्ञानसन्निकर्षेण मनः विषयावस्थितं विषये प्रत्यक्षमुत्पा
दयतीति भावः। शंकते कांचनमयत्वेति अत्र वह्निमानार्थवह्निपरामर्शो वह्नौ कांचनमयत्वमानविवादवारणाय तस्य परामर्शः। स्वतंत्रविशेषणज्ञानसंपादना
यकांचनमयत्वसपक्षतावच्छेदकत्वानुधावने विनिगमनाविरहेण स्यापि विशेषणाभासकतेति। अत्र पर्वतः कांचनमयत्वविशिष्टवह्निमानिति नानुमि
तिः किंतु कांचनमयवह्निः कांचनमयः पर्वतश्च वह्निमानित्येव अन्यथा पर्वतो वह्निव्याप्यवान् अभावव्याप्यवान् अभावश्च वह्नित्वावच्छिन्नप्रतियोगिताकत्व
व्याप्यवानिति परामर्शात्संशयानुमित्यापत्तेः। एवं व्यतिरेकिसाध्यके भावो वह्निव्याप्यवान् अभावव्याप्यवांश्च पर्वत इति परामर्शादापत्तेः सत्प्रतिपक्षप्रसंगः
।। एवमीश्वरो ज्ञानव्याप्यवान् ज्ञानं जन्यताव्याप्यवदिति परामर्शाद्बाधाभाववद्दशायामीश्वरे जन्यज्ञानसिद्धिप्रसंग इत्यस्वारस्यस्य सूचनाय भवत्विति। तद्रासकेति व

ग०टी० ह्रिप्रकारकानुमितिसामग्री तस्य वह्निमान्पर्वतो घटवानित्यनुमितिसामग्रीसाधारणत्वात्। वस्तुतो धूमालोकमहानसादिलिंगकपरामर्शघटितसामग्रीत्वं
२१ दुर्वचमित्यर्थः। वह्निविधेयताप्रयोजकत्वस्यदुर्वचत्वादाहत्य दुर्वचत्वेपीति। नैकरूप्येणेति। तद्विषयकप्रत्यक्षानुमितित्वघटितत्वात्। अप्रत्यूहत्वादिति। त
21 था च प्रत्यक्षसामग्र्यघटिताया अपि अनुमितिसामग्र्याः प्रयोजकत्वादनुमितौ विशेषणाभानसिद्धिरिति भावः। प्रतिकरणधर्मावच्छिन्नाभावसत्वेपि उपनी
तभानस्वीकारे असंकीर्णबाधं स्फुसादप्रतिः इदं त्विति। असंकीर्णदोषेत्येति अथ हृदो वह्निमान् वह्निप्रकारकज्ञानविषयत्वादित्यादौ पोपहृताज्ञानविषयः स
त्वहान्यथाघटादिमत्ताज्ञानविषयो घटादिमानित्यादौ सामान्यतो व्याप्यविशेषसिद्धौ तद्भूतौ तत्साध्यव्याप्तिज्ञानस्यानुपयोगितया तद्विरोधितातद्भूतौ न त
त्साध्यव्यभिचारस्यानसंभवत्तिअतः साक्षादेवव्यभिचारज्ञानस्यानुमितिविरोधित्वेन कथं बाधस्यस्वतंत्रहेत्वाभासता। न च सर्वोपसंहारेण व्याप्तिग्रहे यत्किं
चिद्धेतौ यत्किंचित्साध्यव्यभिचारग्रह एव विरोधी। अन्यथा धूमवान् वह्नेरित्यादावयः पिंडीयवह्नौ धूमव्यभिचारग्रहे महानसीयवह्न्यादिना धूमानुमाना
पत्तेः। प्रकृते च घटवह्न्यादेर्यत्तत्साध्यानुपग्रहात्तद्घटितव्याप्तिग्रहविघटकत्वं व्यभिचारग्रहस्य संभवतीति वाच्यं। पक्षतत्वादेर्घटत्ववह्नित्वादिरूपतया सर्वो
पसंहाराभावात्। तादृशधर्मस्यानुगतत्वे घटादिव्यावृत्तरूपेण वह्न्यादिनिवेशायोगात् अनुगतरूपावच्छिन्नव्याप्तिग्रहे उक्तहेतौ वह्नित्वावच्छिन्नव्यभिचारस्य ह रा म०
स्याकिंचित्करत्वाच्च। तस्मादन्यव्याप्तिग्रहस्य प्रकृतहेतौ प्रकृतसाध्यव्यभिचारग्रहाभावसहितस्य प्रकृतो पक्षधर्मताज्ञानवशेनान्यानुमितिजनकत्वमुपेयं। प्र २१
कृतहेतौ प्रकृतसाध्यव्यभिचाराग्रहे घटादिघटितहेतौ घटादेर्व्यभिचारग्रहसत्वे अनुमितिकारणतायां व्याप्तिज्ञाननिवेशः। एवं च तत्तत्साधनधर्मिकैतत्सा

त

ध्यव्याप्तिग्रहाभावविशिष्टतत्तत्साध्यतत्तत्साधनोपस्थितिरभाव एव तत्तत्साधनधर्मिकतत्तत्साध्यव्यभिचारग्रहाभाव एव वाऽनुमितिहेतुः तेन प्रकृते तद्धे
तुसाध्यतुल्ययोगीनामानंत्येन दुर्ज्ञेयत्वेपि न दोष इत्यविधूतं सिद्धांतलक्षणमेवेति चेन्न । तन्नैकदीधितिकृद्भिर्यत्तद्धर्मानुगमेन सामान्यतो व्याप्तेर्दूषित
त्वात् यत्तु गामानयेति वाक्यश्रवणानंतरं मयांस्य वृद्धस्य गवानयनादिचेष्टामालोच्य तया लिंगेन तत्कारणं गवानयनादिगोचरं तद्वृद्धप्रवृत्तिमनुमाय तत्का
रणं तद्वृद्धस्य गवानयनगोचरकार्यताज्ञानमनुमिनोति न हि तत्र पंप्रवृत्तिरेतत्स्वरूपीयगवानयनकार्यताज्ञानजन्या एतत्स्वरूपीयगवानयनप्रवृत्तत्वादित्यनु
मानसंभवः विशेषतस्तादृशसाध्यस्यानेनाग्रहात् । नापि गवानयनं कार्यताज्ञानविषयः प्रवृत्तिविषयत्वादित्यनुमानं तावता पक्षे गवानयनकार्यताज्ञान
सिद्धावपि मतत्स्वरूपीयगवानयनकार्यताज्ञानपर्यंतासिद्धेः । कार्यांतरे तथाविधज्ञानविषयत्वाग्रहेण दृष्टांताभावात् अतः पापस्य पुंसां पक्षोच प्रवृत्तिः सा
तदीयतद्गोचरकार्यताज्ञानजन्येति यथा मदीयस्तनपानगोचरप्रवृत्तिर्मदीयस्तनपानगोचरकार्यताज्ञानजन्येति सामान्यतो व्याप्तिरूपे पातदूषणादनुमिति
श्चैत्रीयगवानयनकार्यताज्ञानं विषयीकरोत्येव । सामान्यलक्षणांगीकारे सकलज्ञानादीनां ज्ञानत्वादिसामान्यलक्षणया परिज्ञानसंभवेन विशेषण
ज्ञानसंभवात्तदनंगीकारे तदसत्त्वेपि क्षतिविरहात् विशिष्टप्रतियोगिकवैशिष्ट्यानवगाहिनि विशिष्टविशेषणकग्रहे चिविशिष्टज्ञानानपेक्षया चैत्रीय
गवानयनादिकार्यताज्ञानत्वविशिष्टज्ञानं विनापि तद्विशिष्टविशेषणकानुमितेर्बाधकाभावात् । अप्रसिद्धाभावसाध्यकानुमितिवद्वा साध्यतावच्छे
दकावच्छिन्नतद्विशेष्यके वानुमितिः । विशिष्टस्यानुयोगिकवैशिष्ट्यबुद्धौ विशिष्टविशेष्यज्ञानस्य हेतुत्वेप्यप्रतादृशविशिष्टविशेष्यकज्ञाने तद्धेतुत्वाभावात्

ततश्च कार्यताज्ञानजन्योपस्थितत्वात् कस्याश्चन प्रव्याप्तिरेकानुविधानमवधार्य कारणतां निश्चित्य तदन्यथानुपपत्त्या तद्घटकगवादिपदानां तत्तदर्थे शक्तिग्र
हइति सामान्यतो व्याप्तिमूलमेव व्यवहारार्थीनव्युत्पत्त्यादीति जन्त्र। इयं गवानयनगोचरचैत्रप्रवृत्तिः सामानाधिकरण्यप्रत्यासत्त्या स्वजन्यत्वस्वविषयविष
यकत्वोभयसंबंधेन कार्यताज्ञानविशिष्टप्रवृत्तित्वात् मदीयप्रवृत्तिवदित्यनुमानसंभवेनोक्तानुमितिसामग्र्यं तत्रानुपगमेपि प्रयोज्यपुरुषीयगवानयनप्रवृत्तौ का
र्यताज्ञानसिद्धिसंभवात् तादात्म्यभिन्नजयातत्संबंधस्यैतत्संनियामकव्यापकत्वाघटकत्वेन तादात्म्यसंबंधेनोक्तोभयसंबंधेन कार्यताज्ञानविशिष्टमेव
साधनीयं। ईश्वरीयकार्यताज्ञानजन्यतामादाय पर्यवसानं वा। एतादृशजन्यत्वे सामानाधिकरण्यावच्छिन्नत्वनिवेशः सामानाधिकरण्यसमानविषयकत्वोभय
संबंधेन कालांतरीणतदीयगवानयनकार्यताज्ञानमादाय पर्यवसानं वा। एतादृशजन्यत्वप्रवेशः। तत्र च फलोपधानरूपं। अन्ये त्वप्रसिद्धसाध्यसिद्धेरनुरोधेन सा
मान्यतो व्याप्तिसत्वेपि यत्र विशिष्टपरामर्शोत्पत्ति तत्सामग्रीतत्रैव बाधस्य स्वतंत्रहेत्वाभासतेत्याहुः। सामान्यतो व्याप्त्या। प्रसिद्धाभावादिसाधने प्रतियोगिमत्वादि
रूपबाधः संभवतीति बोध्यं। पक्षधर्मताबलेनेति मूलं पक्षाद्योभानियामकं बलं सहकारीत्यर्थः। तादृशपक्षे बाधनिश्चयः तस्य तत्राभावेनियामकः। लाघ
वज्ञानोपलक्षणमिदं। प्रसिद्धं च सिद्धं सपक्षवृत्तिव्यभिचारः साध्यप्रतियोगिकाभावगर्भं इति व्यभिचारसांकर्यं शंकते प्रसिद्धेति। अप्रसिद्धः पक्षवृत्तिः। अ
प्रसिद्धाभाववृत्ति व्यभिचारग्रहदशायामप्रसिद्धसाध्यशंकाव्यभिचारिलिंगकत्वस्याप्रमात्वप्रयोजकतयाप्रसत्त्वापत्तिमाह तद्ज्ञानादिति। नानाव्यक्तिकेव्य राम० २२
भिचारोद्धारे एकव्यक्तिके तदभावमाह तर्हीति व्यभिचारज्ञानस्यानुमितिविरोधित्वं किंतु व्याप्तिज्ञानविरोधित्वे सामान्यधर्मावच्छिन्नीयव्याप्तिग्रहस्योक्तत्वादिति

संभवेपि व्यभिचारस्याप्यसंभव इत्याशयेनेदं । गौः रूपत्वांशे स्वधर्मितावच्छेदकतत्तदवच्छिन्नविशेष्यताकबुद्धौ रूपत्वप्रकारकनिश्चयत्वेन हेतुता निर्धर्मि
तावच्छेदककेति । धर्मीति अन्यथा जात्यात्मकशुक्लत्वावच्छिन्नाभावग्रहस्य ग्राह्यांशे स्वघटितधर्मानवगाहितयाः विरोधित्वसंभवादसंगतेः । पीतिपदानुपा
दाने शंखज्ञानस्य माध्यदर्शनमर्थः स्यात्तथा च तदंतर्गतश्वैत्यप्रकारेण शंखज्ञाने सादृश्यापि लाभः स्यादित्यसंगतिरतः पीतपदं न पीतत्वावगाहित्वलाभार्थं
किंतु श्वैत्यानवगाहित्वलाभार्थमिति समाधत्ते तथापीति । साक्षात्कारिज्ञानत्वेन श्वेतः शंख इति ज्ञानस्यानुप्रतिबध्यता संभवः बाधसामान्यप्रतिबध्यता
वच्छेदककोटावलौकिकत्वनिवेशादतो लौकिकतद्धर्मज्ञाने दोषविशेषजन्यबाधभ्रमप्रतिबंधकत्वमादाय तस्य प्रतिबध्यतां प्रसादयति साक्षात्कारीति दो
षजन्यतयेति साक्षात्कारिभ्रमसाक्षात्कारिविशेषदर्शनं तु तुल्यदोषविशेषजन्यविशेषदर्शनं च विरोधीति भावः । साक्षात्कारिज्ञानस्य दोषनाशाकालीनत्वाभा
वान्नियमतः पीतत्वभानं बोध्यं श्वेतशंखत्वेति तादृशसामग्रीविघटकदोषविशेषकल्पनायां मानाभावादिति भावः । सविवादमिति तथा च शुक्लाभावत्तानं न प्र
तिबंधकं । दोषस्य श्वैत्याविषयकशंखज्ञानं न प्रतिबध्नातीति भावः । यत्र तादृशभ्रमोत्पत्तिकालोत्पत्तिकाले दोषनाशः तत्र भ्रम एव न जायते दोषस्य कार्यका
लवर्त्तित्वेन हेतुत्वात् यत्र भ्रमोत्पत्त्यनंतरं दोषनाशः तत्र तदुत्तरं श्वैत्यग्रहो भवत्येवेत्यपायितदुत्तरं तत्स्योपगमादित्याशयेनास्वरसमिति । उभयाभावानुप
गमपक्षोक्तावपि विशिष्टाभावानुपगमपक्षानुक्तेर्नोपपत्तिरित्यत आह वस्तुतस्त्विति आद्यं वैलक्षण्यं विशिष्टापर्याप्तत्वं पर्याप्तप्रतियोगित्वं विशेषणानां वृत्ति
त्वं वा । द्वितीयं तु पर्याप्तत्वं विशेषणासाधारणं वा एवमग्रेपि । उक्तमेवाह तत्तत्कालीनतत्तत्स्वरूपायत्तद्रव्यज्ञानं प्रतियोग्यप्रवृत्तित्वेन तत्तत्कालीनतत्तत्स्वरूपायत्

ग॰टी॰ २३ हविषयधर्मावच्छिन्नप्रतियोगिताकत्वेन तत्तत्कालीनतत्तत्स्वरूपीयाभाववत्तानिश्चयत्वेन। एवं च तत्कालीनत्वादिनिवेशप्रयोजनं स्फुटमांसह्निंगतिदृष्टा
पत्तिवारणाय इतरबाधाद्यसत्वे इति शेषः। अत एव तदेव समाधानमिति ग्रंथः संगच्छते। न,ड्रासकेत्यपि नास्त्यायां। इष्टापत्तिवारणाय विशेषमासके
ति। तादृशदोषस्य तादृशभ्रमानुमितिसामग्र्यघटकतया तत्समाधानासंगतिमाशंकते समानेति तत्र ते तादृशदोषस्थले विशेषरूपेणाभानोपगंतमते। त
थापीति साध्यसजातीयसमानाधिकरणसाजात्यस्य व्याप्तिघटकतया सामान्यरूपेण प्रसिद्धस्य व्याप्यतानिरूपकत्वेन भानेपि दोषाभाववत्तद्रूपेण प्रसिद्धवि
धेयताकेवयमानुमितिः। दोषसत्वे च विशेषरूपेण भ्रमानुमितिः॥ साध्यसामानाधिकरण्यमात्रस्य तद्घटकत्वे सामान्यलक्षणोवतथात्वंपादिकेति भावः।
ननु अनुमितित्वस्य सामान्यधर्मावच्छिन्नविशेषणतानिप्रकारताकत्वस्य च प्रत्यक्षे नीलपद्मपरनीलोघटइतिवाक्यादिजन्यशाब्दबोधे च सत्वात्। प्रसिद्धतया
नुमितेस्तादृशप्रकारत्वापत्तिरिसंतत्राह प्रत्यक्षेति शाब्दबोधोपलक्षणं। तत्र तथा तात्पर्यज्ञानं दोषः। साध्यतावच्छेदकप्रकारेणोल्लस्य प्रसिद्ध एवान्वयोन
प्रसिद्ध इत्यत्र बीजं दर्शयितुं शंकते यद्यपीति। अर्थापत्तौ करणतयाऽभिमतसंशयप्रणालीमाह पक्षेति। तथा च अभिचारग्रहदशायां सामान्यप्रकारमर्या
नुदयादनुमित्यनुपपत्तिरित्यर्थः। इष्टापत्तिं निरस्यति तिरस्तानादिति उष्टहेतुजन्यत्वस्य भ्रमत्वव्याप्यत्वादिति भावः। अथेति सपक्षवृत्तिधूमे व्यभिचारग्रहेपि
पक्षवृत्ति धूमे व्याप्तिप्रमेति नदुष्टहेतुजन्यतेत्यर्थः। नियमात् समयविशेषजन्यः शतवर्षजीव्येवेत्याकारात्। प्रथममिति मरणोपस्थितावपि उक्तनियमेन राम॰
तज्ज्ञानप्रतिबंधादिति शेषः। मरणानिश्चायकं नियमांतरं दर्शयति अनंतरं चेति। निश्चिनोतीति तथा च गृहमात्रवृत्तित्वरूपव्यापकाभाववत्तानिश्चयात् जी २३

तत्त्वरूपस्याभावरूपतापि स्यादवधारितेतिभावः। प्रतिसंधत्ते इति देवदत्तो जीवति मृतो वेतीत्यनेनास्यान्वयः। तावन्मात्रयोजनं तत्संशये विरोधिभूतविशेषद-
र्शनयोः प्रामाण्यग्रहोऽपेक्षितः। अन्यथा परस्परविरोधेन कृतरकोटिज्ञानमपि न स्यादिति तं व्युत्पादयति देवदत्तस्येति। न संभवतीति तादृशनियमग्रहोऽप्रमे-
त्यन्वयः। शतवर्षजीवितायां गृहमात्रवृत्तित्वव्यभिचाराच्छतवर्षजीवी गृह एवेति नियमग्रहोऽप्रमेत्यर्थः। जीवितायां वहिर्वृत्तित्वमाह चर्यज्ञानेन। गृहमात्रवृत्ति-
त्वव्यभिचारग्रहद्वारा गृहमात्रवृत्तित्वव्याप्तिग्रहे प्रमात्वघटकतादृशाव्यभिचारविरहदोष्यकत्वभावनिर्वाहकं। वहिःसत्त्वेतावृत्ततादृशोत्तिगृहावृत्तित्वे सति गृ-
हेतरावृत्तित्वस्य मरणाव्याप्यत्वात्। तादृशोतिसमयविशेषजन्यत्वरूपलिंगइतिशेषः। न संभवतीति किंवा एतादृशनियमग्रहस्याप्रमेतियोजना। उक्तलिं-
गस्य मरणासाहचर्यज्ञानं एतादृशनियमग्रहे जीवितव्यभिचारविरोध्यकत्वभावनिर्वाहकं। अत्र शतवर्षजीवितायां गृहवृत्तिव्यभिचारादावश्यकं वहिः-
सत्त्वेन जीवितोपस्थितिः तस्मात् गृहवृत्तित्वनियमाद्बहिःसत्त्वेन मरणोपस्थितिस्तामपास्यति योऽर्थापत्तेः करणं वहिःसत्त्वं विना लघुजीवितमनुपपन्नमित्युप-
पादकज्ञानं व्यापारस्तज्जन्यो वहिःसत्त्वार्थापत्तिः प्राभाकराणां मते कारणान्तु लाघवज्ञानाज्जीवित्वसिद्धौ वहिःसत्त्वानुमानमिति विशेषः। सामान्यरूपेणोवम्र-
तत्वजीवितान्यतरत्वेनैव। आत्मानात्मेतिप्रयोजनं स्फुटं न परस्परं व्यभिचार इति। न चैतन्मते लाघवज्ञानादेरिति रवाधजन्यानुमितेर्व्यभिचारो दुर्वारः एवं म-
हानसीयवह्निव्याप्यधूमवत्तापरामर्शजन्यानुमितौ व्यभिचारश्चेति वाच्यं। महानसीयत्वप्रकारतानिरूपितवह्नित्वावच्छिन्नविधेयताकानुमितिं प्रति लाघ-
वज्ञानमतरवाधग्रहान्यतरत्वेन हेतुतातानुलाघवज्ञानाधीनाधिकावगाह्यनुमितौ साध्यतावच्छेदकावच्छिन्नप्रकारकसिद्धेर्विरोधित्वे यत्र लाघवज्ञान

ग०टी० घटितत्वादृशसिद्धिभिन्नविषयकप्रत्यक्षसामग्रीच तत्र भवन्मतेऽनुमितेरेवोत्पादात्तत्तादृशप्रत्यक्षवारणाय तादृशसिद्ध्यभावघटितसामग्र्याः प्रतिबंध
२४ कत्वमावश्यकं अन्यथा तत्र सिद्धिसत्त्वे नानुमित्युत्पादात्प्रत्यक्षोत्पादे इष्टापत्तेस्तत्र कल्पनीयमिति लाघवमित्यत आह तादृशेति। तत्र सिद्ध्यभावस्य
24 प्रवेशे प्रत्यक्षं दुर्वारं स्यादतस्तत्प्रवेशः। बाधानवतारादिति किमर्थमित्याशंकायामाह लाघवज्ञानेति। ननु प्रतिबंधकतायास्तत्तज्ज्ञानावच्छेदकत्वेन संभव
तिप्रतियोगितारूपायास्तस्याश्चावच्छेदकज्ञानाद्यपेक्षत्वेऽप्यनवच्छेदकधर्मदर्शनादौ सत्त्वेन तत्सत्त्वे लाघवज्ञानसत्त्वे महानसीयवन्ह्युत्पादवद्वन्ह्यनुमित्य
नुत्पादानुपपत्तेरत आह प्राप्तीति। विरूपेणेति तथा च तदाज्ञानविशिष्टज्ञानाभावो लाघवज्ञानेऽस्त इति भावः। फलानुरोधमशरणीकरणीयत्वादन्यदेतदि
ति। वन्ह्यंतरत्वं लाघवज्ञानाविषयवन्हित्वं महानसीयत्वादिमान्नं तत्रावच्छेदकतापर्यंतं अन्यथा निरवच्छिन्नवन्हित्वावच्छिन्नत्वरूपस्युदुत्वस्य मतांतरे ला
घवज्ञानाधीनमहानसीयवन्ह्यनुमितेर्वन्हित्वमात्रावच्छिन्नावधेयतापर्याप्तत्वात्तल्लाघवज्ञानप्रतिबध्यतायाम्। एतदर्थमेव दिक्पदं। एतदेव प्रमाणमभि
संधाय पूर्वं लाघवज्ञानघटितसामग्र्याभिन्नविषयकप्रत्यक्षप्रतिबंधकत्वस्य प्रामाणिकत्वमुक्तं। अदोषत्वादिति विशेषधर्मावच्छिन्नव्याप्तिग्रहं प्रत्येव तस्य वि
रोधित्वात्तस्मात्सादनुमितिविरोधित्वाभावाच्चेति भावः। लघ्वर्थभासकत्वमेवेति। सामान्यरूपेणापीत्यादिः। लघ्वर्थभानमपेक्ष्य विधेयतया लघ्वर्थेऽ
न्तित्वे लाघवमतः पुरुषांतरेण लघ्वर्थभानं साधयति एवमिति। पर्वतचत्वरादीति पर्वतीयवह्निधर्मिकलाघवज्ञानविरहविशिष्टलाघवज्ञानस्य प्रतिबध्यताव राम॰
च्छेदककोटौ पर्वतविशेष्यकत्वानुपादाने पर्वतीयवह्नौ महानसीयवह्नौ च लाघवज्ञानसत्त्वे चत्वरादिपक्षकवह्निपरामर्शाच्चत्वरादौ पर्वतीयवह्निभानप्रसंगः। २४

नचेष्टापत्तिः अबाधितार्थविषयकत्वावच्छिन्नस्य अबाधितपक्षकपरामर्शस्य हकादित्वादिति तत्र पर्वतविशेष्यकत्वनिवेशः। एवं च तत्र विशेष्यकत्वफ-
लमूलं। अन्यथा पर्याप्तिमन्निवेश्य वह्नित्वावच्छिन्नविधेयकत्वस्य लाघवज्ञानमतिव्याप्त्या तावच्छेदकत्वं पर्वतीयवह्न्यादेरेवेति वह्नित्वादिनेत्यादिः। एवं
चत्वरीयवह्नीत्यत्रापि। नव्यमते इति। उपाध्यायमते बाधग्रहस्य विरोधितया नोत्तेजकत्वमिति सूचयति बाधग्रहधर्मिणो विशिष्येति प्रतिबंध्यतावच्छेदक-
कोटिनिवेशप्रयोजनं च तत्र शब्दाविति तद्धर्मिकबाधितवह्न्यनुमितौ तद्धर्मिकमहानसीयवह्निबाधग्रहविरहत्वविशिष्टलाघवज्ञानस्य प्रतिबंधकतावारणाय त-
द्बाधितेति। तद्बाधग्रहेपीति। तद्बाधग्रहस्य हेतुत्वशंकावारणाय। ननूक्तरीत्या बाधग्रहोत्तेजकताया आवश्यकत्वे विपदा विशेषणांतरं न किमपि प्रसिद्धं तदानी-
मपि क्लृप्तसामग्रीवशान्मनीयत्वेनानुमित्यापत्तिः। तदितरबाधग्रहेतुत्वमावश्यकमित्यत आह यत्रेति लाघवेन विशेषणांतरप्रसिद्धिर्वैयर्थ्यं कार्यतावच्छेदके नि-
वेशस्यादिः। यादृशं विशेषणत्वमिति। साक्षात्तद्विशेषणकोटिप्रविष्टपदार्थविशेषणतयावेति यावत्। नहि शिष्टेति इतरबाधविशिष्टधूमस्य महानसीयवह्निव्या-
प्यत्वादित्यर्थः। शब्दादिनेति महानसीयवह्निव्याप्यवह्निव्याप्यमहानसीयान्यवन्ह्यभाववोभयवान् पर्वत इत्याकारकविशेषणांतरव्याप्तिविशिष्टपरामर्शसंभवा-
दिति भावः। न्यूनताभंगायाह यत्रेति महानसीयान्यवन्ह्यभावव्याप्यवत्तापरामर्शात्पक्षे वह्निसामान्यबाधेपि महानसीयवह्नित्वावच्छिन्नानुमित्यापत्तेः
सामान्यज्ञानात्तुष्यावर्तनं। वह्नीति महानसीयवह्निव्याप्यवह्निमहानसीयान्यवन्ह्यभावव्याप्योभयवान् पक्ष इत्याकारकस्येत्यर्थः। असंकीर्णानाधांतरं दर्श-
यति मूले साध्याभावमात्रेति मात्रेणकात्स्न्येन। गादाधर्यामिदं वर्त्तते इति अवच्छेदकावच्छेदेन हेतुमत्ताज्ञानस्थलेपीत्यर्थः। एवकारेण साध्ये साध्यतंवंधेवाप

ग० टी०
२५
25

क्षतावच्छेदकावच्छिन्नत्वमवच्छेदः। व्याप्यस्येति व्याप्यताघटकसंबंधेन हेतुमति पक्षे व्यापकताघटकसंबंधेन साध्यासत्वरूपव्यभिचारः स्यादित्यर्थः
। पक्षतावच्छेदकव्यापकत्वावच्छिन्नसंबंधस्य व्यापकताघटकतया भानस्थले एव तादृशसंबंधेन साध्यानुमितिरुपाध्यायानामिष्टेति भावः। परामर्श
स्यैव पक्षतावच्छेदकावच्छिन्नत्वभासकत्वं निराकरोति नंत्विति। बाधाभावे त्विति। पर्याप्तत्वावच्छिन्नसंयोगादिसंसर्गकवन्ह्यनुमितित्वावच्छिन्नं प्रतिपर्वतत
त्वसामानाधिकरण्येन निर्वह्नित्वग्रहस्य प्रतिबंधकत्वादिति भावः। उपाध्यायमते तादृशसंसर्गकव्यापकज्ञानजन्यानुमितौ तादृशप्रतिबध्यतावच्छेदक
प्रसिद्धिं न च सामानाधिकरण्येन परामर्शात्तादृशबाधाभावदशायामवच्छेदकावच्छेदेनानुमितिवारणाय परामर्शस्यैव तत्कारणत्वं कल्प्यमिति गौरवमि
ति वाच्यं। अवच्छेदकावच्छेदेन शुद्धसंयोगघटितव्यापकतापरामर्शादुपाध्यायेन सामानाधिकरण्येनानुमितिरूपेयतया तत्र तद्धेतुत्वे कल्पनीये संसर्गांशे प
र्याप्तिमनिवेश्यावच्छिन्नसंयोगसंसर्गकानुमितिसाधारणसंसर्गकानुमितित्वस्यैव तत्कार्यतावच्छेदकत्वोपगमात्। परं त्ववच्छिन्नसंयोगघटितव्यापक
तापरामर्शवदनेनापि तादृशबाधाभावोऽपेक्षणीयः तदसत्वे तत्रापि सामानाधिकरण्यमात्रेणैवानुमितिसत्तेः। अथ सामानाधिकरण्येनानुमितावव
दकावच्छेदेन हेतुमत्तापरामर्शस्य न पृथक्कारणत्वात्। संसर्गांशे पर्याप्तिमनिवेश्य सामानाधिकरण्येन हेतुमत्तापरामर्शकारणतयैवोपपत्तेः। एवं च तद
द्विति बाधाभावस्यावच्छेदकावच्छेदेनानुमितिजनने अवच्छिन्नसंयोगसंसर्गकपरामर्शत्वावच्छिन्नसहकारित्वं न संभवति तद्रूपस्य जनकतानवच्छेद
कत्वात्। संयोगादिसंसर्गकपरामर्शत्वावच्छिन्नसहकारित्वे च सर्वोक्तातिप्रसंगतादवस्थ्यमेवं। पक्षतावच्छेदकसामानाधिकरण्येन धूमाभावं तदव ग०
२५

च्छेदेनधूममवगाहमानात्संशयादनुमितिर्वाव्याप्यपरामर्शहेतुज्ञानयोःसंसर्गांशेपर्याप्तिनिवेशनमावश्यकं।प्रसक्तावच्छेदकसामानाधिकरण्यमात्रे
ण्योभयकोटिज्ञानादनुमितिस्तुलनपेक्ष्यावच्छिन्नविशेषणतासंसर्गावच्छिन्नधूमाभावप्रकारताशून्यत्वरूपस्यैवनिर्णायत्वस्यनिवेशनयातत्तदुक्तसं
शयस्यदुर्वारत्वादित्यनायत्यावच्छेदकावच्छेदेनहेतुमत्ताज्ञानस्यपकहेतुत्वात्।एवंशुद्धसंयोगादिसंसर्गावच्छिन्नधूमप्रकारतात्वावच्छेदेनधूमाभा
ववद्विशेष्यताकत्वावगाहिनोःवच्छिन्नसंयोगादिसंसर्गावच्छिन्नधूमप्रकारतात्वावच्छेदेनधूमाभाववद्विशेष्यकत्वावगाहिनश्चाप्रामाण्यग्रहस्य
पृथगभावनिवेशात्तद्दोषेणशुद्धसंयोगादिसंसर्गकपरामर्शावच्छिन्नसंयोगादिसंसर्गकपरामर्शयो।पृथक्कारणत्वंबोध्यं।एककारणत्वेएकत्रै
वउभयविधाप्रामाण्यग्रहाभावनिवेशोएकविधपरामर्शे।न्यविधाप्रामाण्यज्ञानदशायामनुमित्यनुत्पादप्रसंगात्।नचहेतुप्रकारतायामेवस्वीय
धूमाभाववद्विशेष्यतानिरूपितत्वप्रकारतानिरूपितविशेष्यतावत्त्वसंबंधावच्छिन्नाप्रामाण्यग्रहाभावनिवेशान्नदोषइतिवाच्यं।धूमप्रकारतात्वेनप्र।
क्किंचिद्धूमप्रकारतामात्रविशेष्यकस्यधूमाभाववद्विशेष्यतानिरूपितत्वग्रहस्यसत्त्वेपिधूमांतरप्रकारताकपरामर्शादनुमित्यापत्तेः।यदिचतत्रस्वीय
तादृशविशेष्यतावच्छेदकीभूतशुद्धसंयोगावच्छिन्नत्वविशिष्टधूमप्रकारतात्वसंबंधेनप्रथमोऽप्रामाण्यग्रहस्याभावःस्वीयतादृशविशेष्यतावच्छे
दकीभूतावच्छिन्नसंयोगावच्छिन्नत्वविशिष्टधूमप्रकारतात्वसंबंधेनद्वितीयस्तस्याभावोधूमप्रकारतायांनिवेश्यतेइत्युच्यतेतदातयोर्विशेष्यविशे
षणभावोविनिगमनाविरहः।प्रकारांतरीयाप्रामाण्यग्रहदशायामनुमित्यनुत्पादप्रसंगश्चेतिचेदेवं।नोपपद्यतेइति।इतरथाव्यभिचारप्रसंगादितिभावः।

ग॰टी॰
२६
26

दीधितिं खंडयति इदं। त्विति तत्त्वमातः तादृशाद्या मिश्रमातः। ननु सल्लिंगपरामर्शान्न भ्रमानुमितिरिति नियमादेव गुणं विशिष्टसत्तावानित्यनुमितिवा
रणाय तन्निवेशानमावश्यकमित्यत आह हदिगिति तत्तर्हि पक्षतावच्छेदकदेशाद्यवच्छेदेन भ्रमानुमितिरिति विनियमं गप्रसंगभयेनापलपनीयेति दिगर्थः
। वस्तुतस्तु भ्रमानुमित्यौपयिकपरामर्शस्य भ्रमत्वसंभवेन तदुपादानमावश्यकमिति नियमस्य परामर्शभ्रमत्वस्य पक्षे साध्यभ्रमत्वोपपादकत्वे तात्पर्यादिदं
शकालाद्यवच्छेदेनानुमितौ च न साध्यांशो भ्रमः किंतु अवच्छेदकांश एवेति न तद्विशेषणानर्थक्यमिति। मंगलादीनि मंगलमध्यानि मंगलांतानि
शास्त्राणि प्रथंत इति स्मृतिमनुसृत्याह गिरीद्रेति॥ ध्वांतानुमानविदतिः पाकृष्णेन निर्मिता॥ पांडुरं गं घिरो लंव विदलस्यात्र सूक्तयः॥ ॥ एषानुमा
नसूत्रस्य तत्र गदाधरपदानुगा॥ नव्यं च चूरितानर्थान् प्रकाशयतु सर्वदा॥ २॥ ॥ ॥ इत्यारडोपाह्वकृष्णभट्टविनिर्मितानुमानखंडगादाधरीविवृतिः॥

राम॰
२६